उपलब्ध होती हैं तो कुछ अद्यावधि अव्याख्यात भी उपलब्ध होते हैं. इस प्रस्तुत ग्रन्थमालामें हम श्रीमत्प्रभुचरणोंके वादग्रन्थोंको एककायतया दो खण्डोंमें प्रकाशित करने जा रहे हैं. यह हमारे लिये न केवल हर्ष अपितु परमसौभाग्यका भी विषय है.

मूलमें मनोरथ तो यही था कि आधुनिक रीतिसे सम्पादित कर इन्हें प्रकाशित कर पाते परन्तु दौर्भाग्येन समयावकाशकी न्यूनतावश वह शक्य न होनेसे, पूर्वमें नित्यलीलास्थ गो. श्रीदेवकीनन्दनाचार्य महाराजकी स्मारिका ग्रन्थमालाके प्रथमरत्नतया चतुर्थ-पञ्चमपीठ (कामां-भरतपुर) से वि.सं.१९८३९(तदनुसार ई.१९२६)में प्रकाशित संस्करणका यह ऑफसेट प्रॉसेसद्वारा पुनःप्रकाशित संस्करण प्रकट कर रहे हैं. उस संस्करणके सम्पादक श्रीजगन्नाथ कृष्णलाल शास्त्री तथा प्रकाशक गोस्वामी श्रीवल्लभलालजी महाराज थे. उन दोनोंके प्रति हम अपनी हार्दिक कृतज्ञता प्रकट करते हैं. उस मूल संस्करणमें प्रस्तावना भाग तथा ग्रन्थभाग एवं सरलीकृत सानुवाद प्रश्नोत्तररूप विद्वन्मण्डन यों तीन खण्डोंमें प्रकाशित हुवा था उसमेंसे प्रथम तथा द्वितीय खण्ड यहां इस संस्करणमें एककायतया मुद्रित हो रहे हैं. अन्य सब कुछ यथावत् है.

प्रस्तुत ग्रन्थमालाके द्वितीयभागतया श्रीमत्प्रभुचरणविरचित भक्तिहंस भक्तिहेतुनिर्णय भक्तिजीवनम् मुक्तितारतम्यनिर्णयः तथा उल्लिखित सरलीकृत प्रश्नोत्तरात्मक विद्वन्मण्डन प्रकाशित हो रहे हैं. एतदर्थ हमारे श्रीमनीष बराई, जिन्होंने मुद्रणार्थ अपेक्षित सर्वविध सहयोग प्रदान किया उनका तथा श्रीवल्लभविद्यापीठ-श्रीविठ्ठलेशप्रभुचरण आ.हो.ट्रस्टके सहयोगी ट्रस्टी श्रीहंसराज गो. वेद आदि सभीके प्रति अपना आभार प्रकट करते हैं. शेष भगवत्प्रदत्त सामर्थ्य एवं अवकाश के अनुसार...

पौषशुक्ला पञ्चमी, वि.सं.२०५९. *गोस्वामी श्याम मनोहर*

(पार्ले-मुंबई)

upon India, these interpretations were almost lost, and barring a few वृत्तिs mentioned here and there, S'ankara's is the most ancient interpretation now available to us. Oriental scholars have studied his interpretation carefully, and they find that he has superimposed his doctrine of माया on the natural meaning of the Sūtras. He was followed by भास्कर, रामानुज, मध्व, निम्बार्क and others who have all challenged his interpretation, and as Vallabhācharya's अणुभाष्य, and प्रकाश are read more and more, his merits as a true and faithful interpreter of ब्रह्मसूत्रs are widely recognised. This work of Vitthales'wara also purports to deal with the true nature of ब्रह्म, whether it is निर्विशेष as interpreted by S'ankara, or सविशेष or both, and the author takes the reader over all the important disputed subjects with a freshness and zeal all his own.

विद्वन्मण्डन is quoted in the latter portion of अणुभाष्य, but no reference is made in विद्वन्मण्डन to the latter सूत्रs, and so it seems to have been written by Vitthales'vara before he completed अणुभाष्य. Noble thoughts and powerful arguments are depicted in very graceful and flowing language, and this charming treatise well deserves the name विद्वन्मण्डन, the ornament of the learned.

The work is divided into three volumes; the first volume contains the text, together with the four commentaries, of which the fourth one सिद्धान्तशोभा is put at the end, because originally it was decided not to publish it, it being incomplete. Subsequently, at the suggestion of Mr. Mulchandra T. Teliwala, it was included in the publication, and printed at the end. He was asked to write an Introduction to the whole work in English, and he undertook the task, and wrote the life of the author of the work, S'ri Vitthales'vara, throwing new light on many details, but before he could write about the work and the commentators, he was suddenly snatched away by God from the Earth, and the reader will have to content himself with the lucid Sanskrit and Hindi Nishkarshas given in the second volume by Jagannath Shastri, under the direction of Shastri Vāmanāchārya, and the various facts about the Manuscripts on which the texts of the original and Teekas are based, about the nature of the work, the time when it was written, the motive of writing it, and about the lives of the commentators, introductions to Vidvanmandana and the other valuable details so elaborately given in the third volume. Fortunately Chitras of the authors of the original work as well as the first three commentators have been found, and they have been all inserted in the work.

# श्रीमद्विद्वन्मण्डनस्थविषयाणां सूचीक्रमः ।


| | विषयः | पृष्ठसङ्ख्या |
|---|---|---|
| | मङ्गलाचरणम् ... ... ... ... | १ |
| १ | ब्रह्मणि विप्रतिपत्तिविषयवाक्यप्रदर्शनम् | १२ |
| २ | निर्विशेषप्रतिपादकवाक्यविचारः ... | २० |
| ३ | उपहितकर्तृत्वनिरासः ... ... | २५ |
| ४ | अध्यारोपापवादविचारः ... ... | ३९ |
| ५ | अविद्याकृतं सर्वमिति विचारः... ... | ४४ |
| ६ | जीवस्वरूपविचारोपक्रमे बिम्बप्रतिबिम्बभावखण्डनम् ... ... ... | ४९ |
| ७ | मायिकसिद्धान्तरीत्या न वैधप्रवृत्तिः सम्भवतीति ... ... ... | ५९ |
| ८ | प्रकारान्तरेण बिम्बप्रतिबिम्बभावखण्डनम् ... ... ... ... ... | ६१ |
| ९ | जीवस्याभासता, तन्निरासमुपक्रम्याभासकसम्बन्धतदनादित्वादिखण्डनम्... | ६६ |
| १० | परमतेनाविर्भावतिरोभावखण्डनम् ... | ७५ |
| ११ | आविर्भावतिरोभावयोर्लक्षणनिरूपणमुखेन मण्डनम् ... ... ... | ८५ |
| १२ | आवित्वानुपपत्तिपरिहारपूर्वकाविर्भावतिरोभावनिष्कृष्टलक्षणप्रदर्शनम् ... | १०४ |
| १३ | क्रमिकदेशकालनियत्वमूलकसर्वोपलम्भापत्तिस्तत्परिहारश्च ... ... | १२१ |
| १४ | महावाक्यार्थनिरूपणम् ... ... | १२५ |
| १५ | जगदाविद्यकतानिराकृतिमुखेन ब्रह्माकर्तृत्वनिरासः ... ... ... ... | १३० |
| १६ | जीवब्रह्माभेदानुपपत्तिप्रदर्शनपुरःसरमुपहितकर्तृत्वविचारः ... ... | १३५ |
| १७ | जीवस्य ब्रह्मांशत्वोपपादनम् ... ... | १४१ |
| १८ | निरवयवत्वस्यांशत्वाबाधकतां प्रदर्श्य तादात्म्येन जीवब्रह्माभेदोपपादनम्... | १४८ |
| १९ | प्रमाद्यनुपपत्त्या जीवब्रह्माभेदखण्डनं, श्रुतिसूत्रादिबलेन तन्मण्डनञ्च ... | १५२ |
| २० | कारणैक्येन कार्यवैचित्र्यानुपपत्तिमाशङ्क्य भगवदिच्छयेति तत्समाधानम् | १५६ |
| २१ | परमात्मविषये कृतहान्यकृताभ्यागमप्रयुक्तदूषणविचारः ... ... ... | १५७ |
| २२ | प्रवृत्तिनिवृत्त्योर्जीवादृष्टसापेक्षतां निराकृत्य भगवत्क्रीडाया निबन्धनत्वसाधनम्... ... ... ... ... | १६० |
| २३ | औपचारिकांशत्वतन्निरासौ ... ... | १६६ |
| २४ | व्युच्चरणमुत्पत्तिरित्याशङ्का, तत्परिहारायाग्निविस्फुलिङ्गदृष्टान्तोपवर्णनम् ... | १७० |
| २५ | जीवप्रवेशविषये विचारः ... ... | १८० |
| २६ | जीवो नाणुरिति पूर्वपक्षिमतम् ... | १८२ |
| २७ | पूर्वपक्षप्रतिक्षेपपुरःसरं जीवाणुत्वव्युत्पादनम् ... ... ... ... | १८६ |
| २८ | व्यापकत्वमाशङ्क्य तत्परिहारे विसर्पिगुणतासाधनमुखेऽणुत्वसाधकप्रमाणोपन्यासः ... ... ... ... | १९० |
| २९ | उत्क्रान्त्यादिसूत्रीयशाङ्करमतनिरासः... | १९३ |
| ३० | विरुद्धसर्वधर्माश्रयत्वे शङ्कापरिहारौ ... | १९५ |
| ३१ | विरुद्धसर्वधर्माश्रयतानिरासमभिप्रेत्य निर्विशेषताप्रदर्शनं ब्रह्मणः ... ... | १९६ |
| ३२ | तदुभयलिङ्गाधिकरणमाश्रित्य पूर्वपक्षिमतनिरासः ... ... ... ... ... | २०४ |
| ३३ | ब्रह्मणः सविशेषत्वं जीवाविद्याकल्पितमित्यस्य प्रकारान्तरेण खण्डनम् ... | २१४ |
| ३४ | ब्रह्मसूत्रैः सविशेषश्रुतीनामुपासनार्थं ब्रह्मपरता साध्यत इत्यस्य खण्डनम् ... | २१८ |
| ३५ | विरुद्धधर्माश्रयतासाधनेनैकरसत्वानुपपत्तिसमाधिः ... ... ... ... | २१९ |
| ३६ | पराभिमतोपासनास्वरूपदूषणमविरोधव्युत्पादनञ्च... ... ... ... | २२५ |
| ३७ | प्रतिपत्त्यर्थमारोपहति निरस्य ब्रह्मणोऽप्राकृतधर्मत्वप्रतिपादनम् ... ... | २३० |

| विषयः | पृष्ठसङ्ख्या |
|---|---|
| ३८ ब्रह्मणः स्वेच्छया दर्शनादिव्यवहारविषयत्वं, अन्यदा तदभाव इति तदुपपादकविरुद्धश्रुतिव्यवस्थापनम् ... | २४१ |
| ३९ विरुद्धधर्माधारत्वं श्रौतमिति न तत्र लोकरीत्या दोषसम्भवः ... ... | २४६ |
| ४० विश्वरूपादिदर्शनं मायिकमित्यस्य खण्डनम् ... ... ... ... ... | २४८ |
| ४१ ब्रह्मणो रसरूपतया विरुद्धधर्माधारतया च कामादिलीलाया नानुकरणता ... | २५१ |
| ४२ ईश्वरस्य शरीरं न स्वाभाविकमिति न्यायनयनिराकरणम् ... ... | २५७ |
| ४३ ब्रह्मधर्मा ब्रह्मतो भिन्ना अभिन्नाश्चेति श्रुतिबलेन व्यवस्थापनम् ... ... | २७४ |
| ४४ लीलाविशिष्टभगवत्स्वरूपस्य नित्यताप्रतिपादनम्... ... ... ... | २७५ |
| ४५ भगवन्नाम्नां नित्यत्वलोकविलक्षणत्वानौपचारिकत्वादिप्रतिपादनम् ... ... | २८४ |
| ४६ लीलासम्बन्धिनित्यत्वोपपादकप्रमाणदर्शनम् ... ... ... ... | २९३ |
| ४७ भगवत्कर्मणां नित्यत्वदर्शनसाधनत्वयोरुपपादनं भूतार्थप्रयोगोपपत्तिश्च ... | ३०२ |
| ४८ नित्यलीलास्थानानामधिष्ठानध्वंसप्रयुक्तानित्यत्वस्य परिहारः ... ... | ३०६ |
| ४९ कालनित्यत्वभूतभविष्यदर्थकप्रयोगक्रमिकाविर्भावतथानुभवाद्युपपत्तिप्रदर्शनपुरःसरो लीलानित्यत्ववादोपसंहारः | ३१५ |
| ५० अनित्यत्वापत्तिपरिहारपूर्वकमाधुनिकभक्तानां लीलान्तःपातित्वसमर्थनम् | ३२१ |
| ५१ युक्तिभिर्लीलानित्यत्वोपपादनम् ... | ३२६ |
| ५२ सर्वदृश्यगोकुलमथुरादीनां लीलासम्बन्धित्वाभावेपि लीलासम्बन्धिपदार्थाभिव्यक्तिस्थानतया भक्तप्रीतिविषयतेति कथनम् ... ... ... | ३२९ |
| ५३ प्रभासीयलीला विषयतारूपा मायिकीति प्रमाणबलेन निरूपणम् ... ... | ३३१ |
| ५४ युक्तिबलेन प्रभासीयलीलायां मायिकत्वप्रदर्शनम्... ... ... ... | ३३८ |
| ५५ प्रभासीयप्रसङ्गस्थसन्दिग्धवाक्यानां तात्पर्यार्थप्रदर्शनम् ... ... ... | ३३९ |
| ५६ प्रभासीयलीलासम्बन्धियादवकुलं नित्यलीलामध्यपातियादवकुलतो भिन्नमित्युपपादनम्... ... ... ... | ३४१ |
| ५७ स्वर्गादिलीलामध्यपातितया प्रपञ्चोपि नित्य इति ... ... ... ... | ३४९ |
| ५८ ग्रन्थोपसंहारः... ... ... ... | ३५३ |

समाप्तः सूचीक्रमः ।

श्रीहरिर्जयति ।

विद्वज्जनावर्जनं नाम ।

# विद्वन्मण्डनोपोद्घातः ।

## सन्मार्गसंरक्षणापरपर्य्यायः ।

---

### ( अत्यावश्यकविषयविशेषनिवेशविभूषितः । )

---

**विद्वद्भिः सर्वथा श्राव्यं ते हि सन्मार्गरक्षकाः ।**

**यत्रावलम्बनमन्ये श्रीमद्वल्लभाचार्य्यचरणाः ।**

श्रीगोकुलेन्दोर्वपुषच्छटासु लीलारसोल्लासमदोत्कटासु ।
नवाम्बुदानीकघटोद्भटासु मनः प्रसक्तं न विमिश्रतां नः ॥ १ ॥
अकल्पकल्पद्रुममल्पकल्पनाविकल्पजल्पप्रतिकल्पकौतुकम् ।
अनल्पकल्पक्रमसंप्लवप्लवं महाप्रभूणां चरणाम्बुजं वृणे ॥ २ ॥

अलमतिप्रसङ्गेन । सम्प्रति तावच्चतुर्थ–पञ्चमपीठाधीश्वरैर्विख्यातकीर्तीनां श्रीदेवकीनन्दनाचार्य्याणां सूनुरत्नैः श्रीवल्लभाचार्यगोस्वामिवर्य्यैः श्रीमत्प्रभुचरणप्रणीतं विद्वन्मण्डनं प्रकाश्यते । तस्य च सरससुभगगम्भीरपदवाक्यविस्तरविस्तृतप्रतिपाद्यवैभवस्य स्वस्वरूपमहिम्ना विद्वज्जनमनोरमाभिः सुवर्णसूत्रादिभिर्महामहापण्डितप्रणेताभिर्व्याख्याभिराघ्रातगुणार्णवस्य विश्रुतवैदुष्यविशेषयशःप्रकाशितदिङ्मुखैः श्रीमद्वामनाचार्यदेवैः पर्य्यवेक्षितसंशोधनकृत्यस्य तच्छिष्येण पण्डितप्रवरेण श्रीमता जगन्नाथशर्म्ममहोदयेन टिप्पण्या संस्कृतहिन्दीनिष्कर्षद्वयेन चोपढौकितस्य प्रस्तावनयाऽपि च तत्प्रणीतया भृतप्रणिधानस्य विद्वन्मण्डनस्याऽस्य सुगमं स्वरूपमिति "नदीमुखेनेव समुद्रमाविश"दिति न्यायेन ग्रन्थगहनप्रवेशहेतुतया तत्स्वरूपादिविवेचनपरया नास्ति विशेषतोऽर्थः प्रसक्तपौनरुक्त्यया प्रस्तावनयेति ।

तथापि "कलिकालतमश्छन्नदृष्टित्वाद्विदुषामपि । सम्प्रत्यविषयस्तस्य माहात्म्यं समभूद्भुवी" ति वचनेन तेषां तेषां विदुषामपि भगवन्माहात्म्याज्ञानान्यथाज्ञानाभ्यामसम्भावनाविपरीतभावनाभ्यां च वैमुख्यदार्ढ्येन परितस्तमःप्रसर्पणं मास्मभूदवारितमेव, येनेदानीन्तनानां साकारब्रह्मवादैकस्थापकेषु वेदपारगेषु मायावादनिराकर्तृषु सर्ववादिनिरासकृत्सु भक्तिमार्गाब्जमार्तण्डेषु श्रीभागवतपीयूषसमुद्रमथनक्षमेषु तत्सारभूतरासस्त्रीभावपूरितविप्रहेषु रासलीलैकतात्पर्य्येषु प्रतिक्षणनिकुञ्जस्थलीलारससुपूरितेषु सान्निध्यमात्रदत्तश्रीकृष्णप्रेमसु विप्रयोगार्थमेवाऽऽविर्भूतवृन्दावनप्रियेषु भगवद्वाक्पतिषु श्रीमद्वल्लभाचार्य्यचरणेषु श्रिया, कीर्त्या, कान्त्या, वैदुष्यमहिम्ना, स्वरूपेण च तत्तुल्ययशस्तौर्य्यत्रिकेषु श्रीमत्प्रभुचरणपदोपस्तूयमानपरमानुभावेषु तत्पुत्ररत्नेषु श्रीविठ्ठलेश्वरचरणेषु च दोषबुद्ध्या ग्रन्थाभिरुचिरेव प्रणष्टेति "मूलं नास्ति कुतः शाखा" इति न्यायेन तदनुशीलनादौ सुदूरोदस्ते तदनुपयोगसन्मार्गालाभौ, ताभ्यां च "आसुरीं योनिमापन्ना मूढा जन्मनि जन्मनि । मामप्राप्यैव कौन्तेय ततो यान्त्यधमां गतिमि" त्यासुरसर्गप्रवेशाऽधमगती अनिवार्य्ये एव प्रसज्येयाताम्, प्रसक्तश्च

---

१ तत्पुत्रपौत्रतच्छिष्यप्रशिष्यतत्सम्बन्धिषु । २ 'आदि' पदेन तद्ग्रन्थस्तच्छ्रवणादि, तमोभङ्गो, वस्तुप्रकाशस्तदनुसृत्य वर्तनादि च । ३ 'मूढा' इति विशेषणेन सन्मार्गाभाव एव तेषां प्रतिजन्माऽऽसुरयोनिकामेऽधमगतो च निमित्तमिति । स्थितमेत'त्कृष्णसेवा सदा कार्ये' त्यत्र श्रीमत्पुरुषोत्तमीये सिद्धान्तमुक्तावलीविवृतिप्रकाशे ।

सन्मार्गोच्छेदोऽपीति सर्वातिप्रसङ्गपरिहाराय श्रीमद्वल्लभाधीशचरणश्रीविट्ठलेश्वरचरणानां तत्कृतीनां तत्सिद्धान्तसहस्रवीथितेश्च स्वरूपवस्तुयाथात्म्यदिङ्निदर्शनेन प्रोत्साहनद्वारा विदुषामावर्जनं सुतरामावश्यकम् ।

तथाहि—विद्वन्मण्डनमिति नामैव हि विदुषां प्रोत्साहनमिति तदावर्जनावश्यकता तन्नाम्ना श्रीमत्प्रभुचरणोपदिष्टैवेति नास्त्यत्र सन्देहः । मण्डनपदेनैतद्ग्रन्थार्थधारणावधीरणायां वैदुष्यस्य पृथुशाखकथाकन्यारोमन्थतायामेव पर्यवसाने दारिद्र्यदौर्गत्यदुर्भगत्वदौर्भाग्यादिरूपत्वञ्च संसूचितमेव संक्षिप्तवचनैः श्रीमत्प्रभुचरणैरित्यतिरोहितमेवेति ।

एवमत्याग्रहेण विदुषामेतद्ग्रन्थानुशीलनावश्यकत्वकथने बीजं तु पत्रावलम्बनग्रन्थे "डिण्डिमस्तु वादितो द्वारि विश्वेशस्य मयाऽत्र हि । विद्वद्भिः सर्वथा श्राव्यं ते हि सन्मार्गरक्षका " इत्यत्र " ते हि सन्मार्गरक्षका " इति श्रवणे श्रीमदाचार्य्यचरणैर्हेतुनिर्देश एव । विद्वद्भिः सन्मार्गाऽरक्षणे "नीरक्षीरविवेके हंसाऽऽलस्यं त्वमेव तनुषे चेत् । विश्वस्मिन्नधुनान्यः कुलव्रतं पालयिष्यति कः" " उत्सीदेयुरिमे लोका न कुर्यां कर्म चेदहम् । सङ्करस्य च कर्ता स्यामुपहन्यामिमाः प्रजाः" " योऽन्यथा सन्तमात्मानमन्यथा प्रतिपद्यते । किं तेन न कृतं पापं चौरेणाऽऽत्मापहारिणे" त्यादिभिस्तेषां दोषः प्रसज्येत ।

। तस्मात्तत्तन्मताग्रहं परित्यज्याऽपि श्रीमदाचार्य्यचरणमतमेव विद्वद्भिरनुसर्तव्यं मण्डनत्वात् । तदनुसरणाभावे तु वस्तुतो वैदुष्येऽपि संशयः । "बुद्धेः फलमनाग्रह" इति वचनात् । आग्रहे विदुषां कारणं नास्तीत्यनुभाऽऽशान्तिमपर्येषूक्तं श्रीमदाचार्यचरणैः । तथाहि—"नानामतध्वान्तविनाशनक्षमो वेदान्तहृत्पद्मविकासने पटुः । आविष्कृतोऽयं भुवि भाष्यभास्करो बुधा मुधा धावत नान्यवर्त्मसु" इति । भास्करे ह्युदिते उन्मार्गप्रवेशो मनोविक्षेपहेतुक एवेति तदनाग्रहेण सन्मार्गप्रवेश एव वैदुष्यसाफल्यजनकः । तमोविलये प्रकाशे च भ्रमादिसम्भावनाभावेन प्रमाणानुग्राहकान्तरानपेक्षणात् । 'बुधा' इति बुद्धिमत्त्वरूपा स्वरूपयोग्यता तदनुग्राहकश्च भाष्यभास्कर इत्यालोकसंयोगानुगृहीतं चक्षुरिन्द्रियमिव यथार्थबोधोदयमवश्यमेव विदध्यादिति । तत एव मुधेति पदम् । तत एव च पत्रावलम्बनग्रन्थे "सर्वथा श्राव्यमि"ति सर्वथापदम् । "आविष्कृतोऽयं भुवी"ति पदत्रयेण कालप्रतीक्षाप्राप्तो विलम्बो वा भाष्यस्य भास्करत्वोक्तिः 'आदित्यो यूप' इत्याद्यर्थवादवत्स्तुतिमात्रं वा वास्तव्येव नेति संशयो वा लोकान्तरस्थतया स्वानुपयोगित्वेन नाप्राप्तोऽन्यथा निर्वाहो वा न कर्तव्यः, किन्तर्हि 'आविष्कृत' इत्युक्त्या अविलम्बेन 'अय'मित्युक्त्या प्रत्यक्षत्वात्संशयानवसर इति संशयविशसनेन 'भुवी'त्युक्त्याऽन्यथानिर्वाहमकृत्वा च भाष्यभास्करसम्बन्धेनाऽबोधध्वान्तनिवृत्त्या वेदान्तहृत्पद्मविकासे च भक्तिमकरन्दास्वादः सर्वथाऽप्यपरिहरणीय एवेति ।

अन्यत्राऽपि च विद्वज्जनानेव स्वसिद्धान्तग्रहणाय पुरस्कुर्वन्त्यभ्यर्थयन्ते च महोदारचरित्रवन्तः श्रीमदाचार्यचरणाः । "सुहृत्सु हस्तयुगलं पुरतो निधाय विज्ञापयामि मुरवैरिपदाब्जनिष्ठः । उच्छृङ्खलाऽपि[१] मिन्नतिर्मम[२] चिन्तनीया श्रीकृष्णपादयुगले विनिवेशिते"ति ।

विद्वन्मण्डने श्रीमत्प्रभुचरणा अपि—"श्रुतिसूत्रादिमणिभिर्जटितं युक्तिमौक्तिकैः । प्रथितं कुरुते विद्वन्मण्डनं विठ्ठलः सुधी'रिति "ब्रह्मवादे कृतात्मानः प्राप्नुवन्तु हरिं बुधा" इति "वरीवर्ति श्रद्धा श्रुतिषु यदि वा व्यासवचने, तदा विद्वांसोऽस्मद्विरचितमिदं मण्डनवरम् । यथोक्तं कण्ठे वा शुकवदथवाऽर्थञ्च हृदये, मुदा कृत्वाऽऽयत्तं धुनुत रिपुपक्षाभिधतम" इति च विद्वज्जनानेवाऽपेक्षन्तेऽभिमुखीकुर्वन्ति समाह्वयन्ते च ।

तेन प्रवृत्तिप्रचारप्रकाशादिना सन्मार्गरक्षा विद्वज्जनाधीनैव । मूर्खजनसमवायस्तु गतानुगतिक इति स्वमतपरीक्षातदादरतद्ग्रहणधारणप्रचारप्रकाशादिषु साक्षात्स्वातन्त्र्येणाऽनुपयुक्तः । शिष्टादृतमेव च मतमूल्यवयन्त्यनुसरन्ति च प्रेक्षावन्तो, न तु तैः परिहृतमशिष्टगोष्ठीगृहीतमपि । विद्वांस एव च शिष्टास्तत्र तत्र परिभाषित-

१ उच्छृङ्खलत्वं मन्वानस्य गर्हायामपि । २ मम, नाऽन्यस्य । चिन्तनीया, नोपेक्षणीया, मान्यापाततः ईक्षणीया । ननु को विशेषो यस्या अयमाग्रहस्तत्राऽऽह:—श्रीकृष्णेत्यादि । श्रीकृष्णस्य परमतत्त्वता फलता मूलरूपता परमफलता सेव्यता, सा च बहिर्भजनरूपैव मुख्येत्यादि श्रीमदाचार्यचरणैरेव केवलैर्लोके प्रकटितमित्यन्यतो विस्तरः ।

स्वरूपाः । तस्माद्विद्वज्जनावर्जनं साम्प्रदायिकैः सर्वथाऽप्यनुपेक्ष्यमिति श्रीमदाचार्यचरणश्रीमत्प्रभुचरणानां निरन्तरदिगन्तरसन्ततः समन्ततः स्वीयान् प्रत्युपदेशः स्फुटतरं प्राञ्जलः प्रकाशतेतमाम् ।

परप्रोत्साहनाय प्रकृतोपयोगि श्रीमदाचार्यचरणश्रीमत्प्रभुचरणतदुक्तितत्सिद्धान्तानां स्वरूपमपि परमात्मत्वादिरूपं निगूढसरसचमत्कृताशयत्वादिरूपं प्राकृतादित्यवैलक्षण्येन पञ्चरचराचरप्रकाशकसर्वातिशायिप्रकाशशालित्वादिरूपञ्च वस्तुभूतमेतावतैव दिङ्मात्रेण निदर्शितं वेदितव्यम् । तेषां तदुक्तीनां तत्सिद्धान्तस्य च तादृशत्वे मानं तु मूढैर्मृग्यं, न विद्वद्भिः, तेषां स्वयं परीक्षकत्वात्तद्धृदयङ्गमत्वौपयिकनिखिलगुणगणाकरत्वाच्च तद्ग्रन्थानाम् । अन्यथा तद्दर्शनाद्यर्थाय तेषामभिमुखीकरणायोगात् ।

अभिमुखीकरणादिना च विद्वद्भिरमात्सर्येण तद्ग्रन्थानुशीलने तेषां खेदोऽपि सम्भवेदित्यापतति । यथाऽऽहुर्लौकिकाः—"विद्वांसो मत्सरग्रस्ताः प्रभवः स्मयदूषिताः । अबोधोपहताश्चाऽन्ये जीर्णमङ्गे सुभाषित'मिति । "लोकवत्तु लीलाकैवल्य"मिति न्यायात् ।

तेन निर्मत्सरैर्विद्वज्जनैरवश्यमेव परिशीलनीयाः श्रीमदाचार्यचरणश्रीमत्प्रभुचरणानां ग्रन्थाः, समुच्छेत्तव्याश्च तैरेव स्वेषामन्येषाञ्च ते ते सर्वेऽपि संशयाः, समादरणीया धारणीया अनुसरणीयाश्च तदाशयाः, प्रवर्तनीयाश्च तदादरणधारणानुसरणेषु यथाशक्यं सर्वेऽपि जीवाः, तदेव जगतां मङ्गलम्, मण्डनञ्चापि विदुषां तदेवेति प्रकटमेतत् ।

पद्यान्यपीह मत्कृतानि कानिचिदवधेयानि भवन्तु । तथाहि—

गूढा गभीरा गहना गुर्वी मृद्वी मधुः शुचिः ।
विविक्तवर्णा विशदा श्रीमदाचार्यवाक्सुधा ॥ १ ॥

यन्माधुर्यं तदतिविरलं मार्मिकैरभ्युपेयं
तत्राऽपेक्ष्यः परिणतः शास्त्रसंविद्विशेषः ।
अर्थास्तत्राप्यधरितसुधाधामकान्ताः प्रकाशाः
शब्दार्थाभ्यामथ मधुमुचः श्रीमदाचार्यवाचः ॥ २ ॥

हृदयमुपेयतां प्रथमतो विमलावगवं
विशदमुदारमुन्नतमसङ्गगुणाभिरुचि ।
अथ परिशील्यतां सुखमनन्तरसानुस्मृतं
विगलितबाह्यवित्ति च महाप्रभुपादवचः ॥ ३ ॥

वाचः पीयूषदर्पप्रतिभटघटनापाटवाटोपपुष्टा
अर्थश्चाऽऽग्रामतान्तस्तरणितरुणिमोद्रेकनिर्मञ्छनीयः ।
व्युत्पत्तिश्चाऽत्र गोपीपरिवृढवदनाम्भोजभावोपलब्धि-
रित्थं श्रीवल्लभाधीश्वरमुखमधुनः स्फूर्तिमन्तः स्मरेम ॥ ४ ॥

वल्लभेन्दुवचनामृतसेकश्लेकदर्शितविशेषविवेकः ।
अस्तु नः शर्केलितव्यतिरेकः कस्य नश्यति न वस्त्वतिरेकः ॥ ५ ॥

श्रीवल्लभाधीश्वरवाक्प्रवाहा-
वगाहनिर्वाहनिरस्ततापः ।

---

१ अर्थतो गुणानाह गूढा रत्नराशिवत् । गभीरा आनन्त्याज्जलधिवत् । गहना सहसा प्रवेशासम्भवात् । गुर्वी सर्वातिशायिस्वरूपाद्वीरवात्परावरम्यवस्थापकत्वाच्च । मृद्वी मक्लिष्टत्वात् । मधुः रसनीयत्वान्मादकत्वाच्च । शुचिर्दोषाभावान्तरशोधकत्वाच्च स्फुटमन्थवत् । २ सुधाधामा चन्द्रः, स एव कान्तो निष्प्रभत्वात् । ३ पीयूषस्य दर्पेण यः प्रतिभटघटनापाटवाटोपः साम्याभिमानेन प्रतिवस्तुतया स्थितये चातुर्याडम्बरश्चाग्रस्यविशेषस्तेनैव पुष्टाः साधितोत्कर्षा इत्यर्थः । ४ इत्थं स्फूर्तिमन्त इति सम्बन्धः । ५ निजतरसम्बन्ध इति यावत् ।

लीनोऽतिपीनेऽनुगृहीतपाने
    रसे नवीने विहरामि शश्वत् ॥ ६ ॥
श्रीमद्वल्लभदीक्षितेन्दुवदनाम्भोजस्रवन्माधुरी-
    माध्वीकोन्मदमानसैकमधुपमोन्मेषैर्विशेषैर्युतः ।
श्रीमद्गोपवधूहृदन्तरलसत्प्रेमाब्धिसर्वस्वभूः
    श्रीकृष्णस्य निरन्तरेण मनसा सेवारसः प्राप्यताम् ॥ ७ ॥ इति ।

श्रीमत्प्रभुचरणास्तु श्रीमदाचार्यचरणार्जितं महोन्नतममाचार्यसिंहासनमधिरुह्य ऊर्ध्वबाहवो भूत्वैव निखिलं जगदेव समन्ततः सम्बोधयन्तः संश्रावयन्ति च पर्य्यनुयुञ्जते च, यत्—

क्वचित्पाण्डित्यं चेन्न निगमगतिः, सापि यदि, न
    क्रिया सा, सापि स्याद्यदि, न हरिमार्गे परिचयः ।
यदि स्यात्सोऽपि, श्रीव्रजपतिरतिर्नेति निखिले-
    र्गुणैरन्यः को वा विलसति विना वल्लभवरम् ॥ १ ॥

क्वचिद्बुद्धादौ पाण्डित्यं चेद् न निगमगतिः । बुद्धेन तद्दूषणात् । सापि निगमगतिरपि क्वचिज्जैमिन्यादौ यदि ? न क्रिया सा निगमाभिमता । "ब्रह्मण्याधाय कर्माणी" ति "यत्करोषि यदश्नासि" "कायेन वाचा मनसेन्द्रियैर्वा" "ब्रह्मार्पणं ब्रह्महवि" रित्यादेश्च विरोधात् । सापि निगमाभिमता क्रियाऽपि क्वचिच्छ्रीशङ्कराचार्यसिद्धान्तानुगे व्यावहारिकसत्तया यदि ?, न हरिमार्गे भक्तिमार्गे परिचयः । यदि सोऽपि हरिमार्गे परिचयोऽपि क्वचिच्छ्रीमद्वेदव्यासे श्रीशुके श्रीरामानुजादिसिद्धान्ते वाऽस्ति । तेषु व्रजपतिरतिर्नास्ति । व्रजस्य सर्वथा निःसाधनस्य "अहपापूतं निधि शयानमतिश्रमेण लोकं विकुण्ठमुपनेष्यति गोकुलं स्व" मि त्यादिना "ते नाऽधीतश्रुतिगणा नोपासितमहत्तमा" इत्यादिना च विवृतस्वरूपस्य पतिः सर्वात्मना सर्वरक्षकः । "तस्मान्मच्छरणं गोष्ठं मन्नाथं मत्परिग्रहम् । गोपाये स्वात्मयोगेन सोऽयं मे व्रत आहित" इत्यादिवचनात् । तेन केषाञ्चिच्छ्रीकृष्णभक्तत्वेऽपि साधननिष्ठावत्त्वाद्व्रजपतिरतिमत्त्वं न सिद्ध्यतीति ज्ञेयम् । ननु भोः व्रजपतिरतिर्व्रजसीमन्तिनीष्वस्तीति तत्साम्यमाचार्येष्वायातमिति चेत् ?, बाढमुक्तं तत्साम्यमाचार्येष्वस्तीति । यतस्तन्मार्गप्राकट्यायैव मुख्यतया श्रीमदाचार्यचरणानां प्रवृत्तिरिति । तथापि पाण्डित्यनिगमगतितादृशक्रियाहरिमार्गपरिचयरूपा विशेषाः श्रीमदाचार्यचरणेषु समुल्लसन्तस्तास्वपि न भवन्तीत्यत उक्तम्—'इति निखिलैर्गुणैरन्यः को वा विलसति विना वल्लभवरमिति । सर्वोऽप्यसौ विशेषः पण्डितप्रत्यक्षप्रकाश्यः, पण्डितैः सहकारिभिः स्वस्यैव च लोकेऽपि प्रकटनीय इति विदुषामेव तदर्थमपेक्षा, न मूर्खमण्डलस्येति नूनमभिप्रेत्यैव श्रीमत्प्रभुचरणैर्विद्वन्मण्डनग्रन्थप्रणयनमित्यवधेयम् । तत्र 'क्वचित्पाण्डित्य' श्लोकोक्तप्रकारेण निष्कृष्टश्रीमदाचार्यचरणमुख्यसिद्धान्तादर्शो विन्यासितम् ।

श्रीमदाचार्यचरणैर्हि साकारब्रह्मवाद एव मुख्यत्वेन स्वसिद्धान्तः स्थापितः । अष्टादशभिर्विद्याभिः प्रमाणतः प्रमेयतः साधनतः फलतश्च ब्रह्मातिरिक्तपदार्थाभावनिर्णयेन सर्वसमन्वयो ब्रह्मण्येवेति । ब्रह्मवादैकदेशित्वमेव च तेषां तेषां सर्वेषामपि वादानाम् । तच्च मूलं ब्रह्म चराचरप्रपञ्चरूपेण, परावररूपेण, दैवासुरसर्गरूपेण, अहिनकुलन्यायेन परस्परात्यन्तविरुद्धपदार्थधर्मरूपेण, तथैव स्वर्गापवर्गनरकादिविलक्षणसाधनरूपेण, तारतम्यतत्फलरूपेण च सर्वतः "एकाकी न रमते"ति सूत्रानुसारेण विक्रीडिषया विस्तीर्णम् । यद्ज्ञाने सर्वमोक्षं, यस्मिन् विज्ञाते च सर्वमिदं विज्ञातं भवति । साक्षात्ताभस्तु तदनुग्रहैकलभ्यया भक्त्या, न साधनान्तरैः प्रमाणोक्तैः प्रमाणबलकल्पैः । कन्दर्पस्वरूपश्च रसात्मकं रसमयं शोभाद्भुतदर्शनार्थं विस्मयस्तिमितमानसकुटीरोदित-

---

१ नवीनत्वमुत्तरोत्तरमास्वादकत्वादिति । २ "प्राप... व्यपदेशाः" "मुख्ये सम्भवत" इति न्यायाभ्यां माधुर्यमाध्वीकत्वेन रूपकत्वात् । तेन माध्वीकम्, मदकत्वात् ।

लक्षावेश्यनतमस्तकमनसिजरुचिरलावण्यसलिलक्षालितचरणारविन्दनखचन्द्रसाकारमिति च तत्स्वरूपः । श्रीम-त्सर्वोत्तमस्तोत्रे—"साकारब्रह्मवादैकस्थापक" इति ह स्माऽऽहुः श्रीमदाचार्यचरणानां नाम श्रीमत्प्रभुचरणाः ।

स्थापनं नाम सर्वशास्त्राणां व्याख्यानादिना मतान्तरनिराकरणपूर्वकं तत्तात्पर्यकत्वप्रदर्शनं, तात्कालिकैः सर्वैर्वादिभिस्तद्ग्रहणञ्च । तच्च दक्षिणापथस्थितविद्यानगराधीश्वरस्य श्रीकृष्णदेवराजस्याऽऽस्थान्यां प्रवर्तमाने वादयुद्धे "मायावादनिराकर्तृभिः" "सर्ववादिनिरासकृद्भिः" "वेदपारगैः" किलाऽनुष्ठितमाचार्यचरणैः तथैव च त्रिः पृथ्वीं परिक्रम्य दिग्विजयान् विदधानैः, श्रीकाशीविश्वेश्वरमन्दिरद्वारे सर्भूदेववृन्दवन्दनीयास्विन्नै विद्वद्भिकुरम्बनयनारविन्दवदनमालिकाभिरहर्निशमाबद्धतोरणे पत्रावलम्बनादिभिः, प्रमाणचतुष्टयाविरोधरूपया युक्त्या सर्वशास्त्रव्यवस्थापनादिना तद्व्याख्यानादिना च यथावदपेक्षितयावत्सामग्रीसम्पादनपूर्वकं समनुष्ठित-मित्यतिरोहितम् ।

तत्प्रचारस्तु श्रीमत्प्रभुचरणैः कर्तव्यः । प्रचारो नाम सर्वदेशदिशाकालेष्वव्याहतगतित्वम् । यद्वा पण्डितेषु प्रवृत्तिः स्थापनम् । "नमः पितृपदाम्भोजरेणुभ्यो यत्प्रसादतः । भक्तिः प्राप्ता तदन्यास्त्रमोहाभावश्चपण्डिते"-रिति भक्तिहंसीयान्मङ्गलश्लोकात् । आपामरं प्रवृत्तिः प्रचारः । स च न तत्र गुणान्तराधानेन कर्तव्यः । न्यून-ताराहित्यात् । अन्यथा स्थापनमेवाऽसम्भवि, का कथा तत्प्रचारस्येति । किन्तु चक्षुरादिसत्त्वेऽपि तदनुग्राह-कसूर्याद्यभावे तत्प्रचारप्रतिबन्धवच्छ्रीमदाचार्यचरणैरुपसंहृते स्वस्वरूपेऽनुग्राहकाभावेन तमस्तमस्तोमसम्भवे तन्निरासादिना सूर्यवदिति । तथैव च कृतं विद्वन्मण्डनादिभिर्ग्रन्थैः श्रीमत्प्रभुचरणैः । सिध्यति चैतद्विद्वन्मण्ड-नद्वितीयश्लोके—"पितृचरणान्नत्वाऽहं हरिरतिमार्गाम्बुजातमार्तण्डान् । तदनुग्रहतः किञ्चिल्लिखामि यथाय-थाबुद्धी" त्यत्र मार्तण्डतदनुग्रहादिपदैः ।

सुवर्णसूत्रे विद्वन्मण्डनमवतारयन्तः श्रीमत्पुरुषोत्तमा अपि प्रथममङ्गलावतरणिकायामाहुः—"इह हि श्रीमत्प्रभुचरणाः स्वीयानां मुख्यभक्तिमार्गतदुपयोगिब्रह्मवादाप्रचारजनितं खेदमसहमानास्तन्निरासाय विद्व-न्मण्डनं कुर्वन्तः स्वमार्गस्याऽतिगोप्यत्वं सकलप्रमाणमूर्धन्यश्रुतिसिद्धत्वञ्च ज्ञापयन्तस्तदभिज्ञापकं मङ्गलवाक्यं ग्रन्थारम्भे शिष्यशिक्षायै निबध्नन्ति" । इति ।

भक्तिपदं श्रीकृष्णस्नेहे मुख्यमन्यत्र तद्धेतुत्वेन तत्प्रयोगो भाक्त इति भक्तिहंसे स्थितम् । तेन फलात्मक-स्नेहलक्षणो भक्तिमार्गो मुख्यभक्तिमार्गः । किञ्च । "श्रवणं कीर्तनं विष्णोः स्मरणं पादसेवनम् । अर्चनं वन्दनं दास्यं सख्यमात्मनिवेदनम् । इति पुंसाऽर्पिता विष्णौ भक्तिश्चेन्नवलक्षणे" त्यत्र "भक्त्या सञ्जातया भक्त्या" इत्यादिना स्नेहात्मकभक्तिहेतुतया भक्तिपदस्य लाक्षणिकत्वेऽपि स्नेहवशेन क्रियमाणानां श्रवणादीनां स्नेहमध्यपातितया गङ्गाप्रवाहान्तःपातिवाप्योदकवत्स्नेहरूपत्वे लाक्षणिकत्वाभावेन तादृशश्रवणादिरपि मुख्यो भक्तिमार्गः । फलात्मकत्वात्फलस्यैव मुख्यत्वाच्च । मुख्यफलप्रापकत्वादपि श्रवणादीनां मुख्यभक्तिमार्गत्वम् । साक्षात् पुरुषोत्तमतत्स्नेहौ च मुख्यं फलम् । "साक्षात्पुरुषोत्तमप्रापकत्वेन विहितत्वं भक्तिपदप्रवृत्तिनिमित्तं श्रवणादिषु भिन्न"मिति "तथैव तद्वरणा"दिति भक्तिहंसफक्किकयोरेतत्स्थितम् । एवं च भगवद्भावतत्स्नेह-हेतुतयाऽनुष्ठीयमानेष्वपि श्रवणादिषु मुख्यया वृत्त्या भक्तिरवस्य प्रवृत्तिव्यवस्थापनान्न भक्तिपदप्रयोगस्तत्रौप-चारिकः, किन्तु मुख्य इति तद्धेतुतयाऽनुष्ठितानामपि श्रवणादीनां मुख्यभक्तिमार्गता निष्प्रत्यूहा ।

अपि च स्नेहाभावे स्नेहवदुपदेशस्य भक्तिहंससमाप्तौ नियामकत्वव्यवस्थापनात्तद्वदुपदेशानुसारेण क्रियमा-णानां श्रवणादीनां स्नेहमार्गीयत्वादपि तथा ।

अपरञ्च । मायावादिमते "एकमेवाऽद्वितीयं ब्रह्म" "मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति" "अस्थूलमनण्वह्रस्व"मित्यादिभिः श्रुतिभिः सर्वविशेषशून्यतया भाविते ब्रह्मणि प्रपञ्चतत्कर्तृत्वादिविशेषाणा-माध्यासिकतया प्रपञ्चान्तःपातिनां वेदादिसच्छास्त्रतदुक्तपूर्वोक्तप्रकारकश्रवणादिसाधनाचरणतद्बोधितफलानाञ्च ज्ञानकल्पितत्वम् । तथैव च भजनीयत्वोपयुक्तविशेषाणामपि सौन्दर्यमाधुर्यसौशील्यसौलभ्यदयालुत्वपारमैश्व-

योगीनां मिथ्यात्वम् । तथा सति भजनीयस्वरूपप्राप्तस्वरूपतल्लाभोपयोगिसाधनादिसमस्तसामग्रीस्वरूपाणा-
मपारमार्थिकत्वसिद्ध्या कथञ्चन चित्तशुद्ध्यादिहेतुत्वमेव मुख्यभक्तिमार्गस्यापि । तदप्याज्ञानिकं, न पारमा-
र्थिकमित्याज्ञानिकत्वाऽऽन्तरालिकत्वाभ्याममुख्यत्वमेव । "ज्ञानादेव तु कैवल्य"मित्यादिना निर्विशेषज्ञानस्यैव
मुख्यता । तद्व्यावर्तनायाप्यत्र मुख्यपदम् । तेन भजनतत्प्रकाराणां भजनीयतत्प्रकाराणाञ्च नाज्ञानकल्पितत्वं,
किन्तु सत्यत्वमिति सकलश्रुतिसमन्वयसिद्धतया यथार्थज्ञानपूर्वकत्वम् । तत्रापि भगवदनुग्रहैकलभ्यतया भग-
वज्ज्ञानपूर्वकत्वम् । ब्रह्मातिरिक्तपदार्थासिद्ध्या सर्वस्य ब्रह्मात्मकत्वेन च सत्यज्ञानानन्तरूपत्वमेव । नापि
फलतोऽप्यान्तरालिकत्वमिति तत्र मुख्यत्वमबाधितम् ।

ब्रह्मवादस्य तादृशभक्तिमार्गोपयोगित्वं तु माहात्म्यज्ञानजननद्वारा भगवल्लाभसाधनेषु श्रवणादिषु प्रवृत्तस्य
स्नेहोदयावश्यंभावात्पारम्परिकम् । भक्तिमार्गीयफलतत्प्रकारतत्साधनतत्प्रकारतदितिकर्तव्यतानां ब्रह्मात्मकत्वा-
दिना सत्यतया साक्षात्पूर्णरसात्मकपुरुषोत्तमभजने प्राकृतपदार्थानां "प्रकृतैतावत्त्वं हि प्रतिषेधति ततो ब्रवीति
च भूय" इति हीनगुणतयाऽनुपयोगो ब्रह्मात्मकत्वे तु तदाधिदैविकत्वपर्यन्ततायां तैः पदार्थैस्तद्भजनमुपपद्यत
इत्यत्यन्तरङ्गमुद्रयाऽपि मायावादतदुपलक्षितसर्ववादनिरासेन च प्रतिबन्धनिवृत्तिद्वारा तादर्थ्येनापि ।

एवञ्च मुख्यभक्तिमार्गतदुपयोगिब्रह्मवादेऽपि साकारब्रह्मवादस्वरूपमेव निष्कृष्टं श्रीमत्पुरुषोत्तमैरिति ज्ञे-
यम् । आकारपदं अप्राकृतसर्वविशेषोपलक्षकम् ।

सर्वविशेषशून्ये हि ब्रह्मणि न माहात्म्यसिद्धिर्न प्रापञ्चिकानां पदार्थानामज्ञानकल्पितत्वादिना पारमार्थिक-
भजनसिद्धिर्नाप्याधिदैविकत्वं पदार्थानां, नापि च मुख्यभक्तिमार्गलाभः । सर्वविशेषोपपत्तावेव तु सर्वमेत-
त्सुसिद्धम् ।

तदेवाहुः श्रीमदाचार्यचरणाः—"प्रपञ्चो भगवत्कार्यस्तद्रूपो माययाऽभवत् । तच्छक्त्याऽविद्यया त्वस्य जीव-
संसार उच्यते" इत्येतत्स्वकारिकाव्याख्याने "प्रपञ्चमेव मिथ्येत्युक्त्वा शुद्धं भजनं वारयन्ति । तथाऽन्ये जीवं
व्यापकमुक्त्वा । अत उभयनिराकरणार्थं जीवजडयोः स्वरूपमुच्यते" इति ।

व्याख्यातञ्चैतच्छ्रीमत्पुरुषोत्तमैः । तद्यथा—"नन्विदं भक्तिप्रतिपादनार्थं बाधकशास्त्रनिवृत्त्यर्थं च शास्त्रमार-
ब्धम् । तद्विहाय प्रथमतः प्रपञ्चस्वरूपं किमिति विचार्यत इत्याकाङ्क्षायामाहुः—प्रपञ्चमेवेत्यादि । उच्यत
इति । अत्र ब्रह्मवादे प्रपञ्चस्य भगवत्कार्यतया जीवान्तर्यामिणोर्ब्रह्मांशतया च ब्रह्माभेदः साधनीयः । साध-
नान्तरापेक्षया भक्तेर्मुख्यत्वं ब्रह्मणश्च साकारत्वं तत्प्राकट्यस्यैव फलत्वञ्च साधनीयम् । तदर्थं मतान्तरं प्रथ-
मतो निराकर्तव्यम् । तत्रापि प्रपञ्चस्य मिथ्यात्वमेकदेशिमत इति गृहप्रविष्टचौरवत् तन्निराकरणं ततोऽपि
पूर्वं कर्तव्यमित्यतः प्रातिलोम्येनेयं कथनप्रतिज्ञे"ति ।

शुद्धं भजनं नाम ब्रह्मात्मकतया सत्यैः साधनैः सत्यफलाय सत्यात्मकं भजनम् । परमते अज्ञानकल्पितत्वाद-
शुद्धं भजनम् । तच्च प्रपञ्चमिथ्यात्वेन जीवव्यापकत्ववादेन च । प्रकृते तु ब्रह्मवादेन प्रपञ्चसत्यत्वे जीवस्यांशत्वे च
सिद्धे शुद्धं भजनम् । फलात्मकत्वाधिदैविकत्वे अपि शुद्धपदेन संग्राह्ये । साधनस्पर्शेन फलाशया च विमिश्रं
भजनं न शुद्धम् । अनन्यं हि भजनं शुद्धम् । तच्च फलात्मकतया स्वतन्त्रपुरुषार्थरूपत्व एवेति । किञ्च ।
आधिदैविकस्य पूर्णरसात्मकस्य श्रीकृष्णस्य भजनेऽनाधिदैविकपदार्थोपयोगेऽपि न शुद्धं भजनं सिध्यति । तत
एवाहुः—श्रीमदाचार्यचरणा उक्तायां कारिकायाम् "भगवत्कार्यस्तद्रूप" इति । व्याख्यातञ्च तैरेव प्रकाशे "भग-
वत्कार्यः परमकाष्ठापन्नवस्तुकृतिसाध्यः । तादृशोऽपि भगवद्रूप" इति । भगवत्पदं परमकाष्ठापन्नवस्तुवाचकमिति
भगवद्रूपपदेन परमकाष्ठापन्नवस्तुरूपत्वे सिद्धे स्फुटमाधिदैविकत्वमिति । तेन शुद्धपदं मुख्यपदपर्यायरूपम् । सा-
क्षात्पुरुषोत्तमलाभतद्धेतुतत्स्नेहहेतुतयाऽनुष्ठितैः श्रवणादिभिर्भजने भक्तिपदप्रयोगस्य मुख्यत्वेऽपि फलात्मकत्वा-
भावेनामुख्यत्वशङ्का तु स्नेहवदुपदेशनियम्यतया स्नेहमार्गागतत्वव्यवस्थापनप्रदर्शनेन प्राक्सूचितनिराकरणेति स्नेह-
वद्भिश्चानन्यस्यैव भजनस्य स्वतन्त्रपुरुषार्थतयैव च तदनुष्ठानस्योपदेश इति साक्षाच्छ्रीकृष्णलाभतत्स्नेहहेतुतयाऽ-
नुष्ठितानामपि श्रवणादीनां शुद्धत्वं निर्बाधमित्यन्यत्र विस्तरः । विस्पष्टयितव्यश्चोपरिष्टादेतत् ।

एवञ्च मुख्यभक्तिमार्गस्य साकारब्रह्मवादचरमकक्षाविश्रान्ततया ब्रह्मवादासिध्या भक्तिमार्गासिद्धिस्तत्सिद्ध्यैव च तत्सिद्धिरित्यन्वयव्यतिरेकाभ्यां ब्रह्मवादस्य मुख्यभक्तिमार्गोपयोगित्वं प्रस्फुटतरमिति सुष्ठूक्तं श्रीमत्पुरुषोत्तमैः "मुख्यभक्तिमार्गतदुपयोगिब्रह्मवादाप्रचारजनित"मित्यादि, साध्वेव च निष्कृष्टं श्रीमदाचार्यचरणसिद्धान्तस्वरूपमितिविदाङ्कुर्वन्तु विवेकिनो विद्वज्जनाः ।

ग्रन्थाशयप्रविविक्षानुकूल्येन तद्द्वारदर्शनार्थकतया मुख्यभक्तिमार्गतदुपयोगिब्रह्मवादस्वरूपदिङ्मात्रमिहोक्तम्, वस्तुतस्तु मुख्यभक्तिमार्गतदुपयोगिब्रह्मवादप्रचारायैव श्रीमदाचार्यचरणानां प्रवृत्तिमनुसृत्य विद्वन्मण्डनकरणमिति तदध्ययनाध्यापनतदनुशीलनादिना समस्तसंशयोच्छेदपूर्वकं तदुभयस्वरूपतत्पारस्परिकसम्बन्धानुसन्धानं तत एव प्रस्फुटतरं भवतीति तदेव समनुशील्यतां विद्वज्जनैः ।

"आचार्यवान् पुरुषो वेदे"ति श्रीमदाचार्यचरणश्रीमत्प्रभुचरणपादारविन्दानुध्यानधौतया धियाऽनुशीलिताद्विद्वन्मण्डनतोऽस्मान्मुख्यभक्तिमार्गतदुपयोगिब्रह्मवादस्वरूपं हृदयादर्श आसज्जत इव, नयनयोः पुरस्तान्मूर्तमभ्युत्तिष्ठत इव । तेन च तिरोहिताशेषक्लेशविशेषं परमफलात्मकरसैकरससर्वस्वभगवत्स्वरूपतद्भजनानन्दसन्दोहानुभवसुखातिशयविस्मृतसमस्तप्रपञ्चं यतस्तन्मयं तन्मात्रं च भवतीवेति ।

अन्यच्च, ब्रह्मात्मकस्य ब्रह्मकार्यस्य च प्रपञ्चस्य परावरव्यवस्थायां ब्रह्मविद एवाधिकारस्य नाप्राप्ततया, ब्रह्मविदैव च मुख्यफलाविरोधेन सर्वसेतूनां सामञ्जस्येन शक्यसंरक्षणत्वाद्ब्रह्मविदामेव च मन्वादिमुनीनां तथा सर्वसामञ्जस्यपुरःसरं सर्वसेतुसंरक्षणस्य वेदेतिहासस्मृतिपुराणेषु भूयो भूयो निदर्शनाच्च तथाविधस्य ब्रह्मविदः सम्प्रत्यभाव एव जगतः समस्तसेतूनामिदानींतन उच्छेदे धर्मभ्रंशे भगवत्सेवनप्रवृत्तिमान्द्यर्यादौ सच्छूद्राशेयित्यादौ दारिद्र्यदुर्मरणदुर्भिक्षादौ च निदानम्, पुनर्यथावत्तदवस्थापनव्यवस्थापनाद्यभावे च स एव हेतुः । स च निबन्धविद्वन्मण्डनसदृशग्रन्थानुशीलनतदाशयधारणादिना सति भगवत्सङ्कल्पे सर्वथैव सूद्दरो, न त्वंशतोऽपि दुरुद्दर इत्यनुसन्धेयमेतत् ।

न हि मुख्यभक्तिमार्गतदुपयोगिब्रह्मवादनिरूपणं पाषण्डिनां मतमिव स्वार्थायार्थाय दुराग्रहग्रहिलं वाचाऽऽरम्भणञ्च, किन्तु यथार्था वस्तुस्थितिरिति । तेन य इदानीन्तना दुरुच्छेदास्ते ते लौकिकाः क्लेशा यदुच्छेदाय प्रवर्तमानानां तेषां तेषां लौकिकविदुषामनेकेषां सङ्क्षयोऽभूद्भवति च, नतु तदुच्छेदस्ते सर्वेऽपि समूलमेवोत्सीदेयुर्यदि लभ्येत भगवत्कृपया निबन्धविद्वन्मण्डनादिभिर्विवक्षितस्वरूपो ब्रह्मविद् । यावच्च तदलाभस्तावदाशामोदकचर्वणमेव जना अनुसरन्तु कामं, न तु तन्मनोरथाभिपूर्तिस्स्वप्नेऽपीति तु भाग्यबुद्धिदोषादनाकर्णितकेऽपि भूयो भूय उद्घोष्यतेतमामस्माभिः ।

सम्प्रति तादृशस्य ब्रह्मविदो लाभस्तु न तावन्निबन्धविद्वन्मण्डनादीनां यथाकथञ्चन विलोकनादिमात्रेण, किन्तु तेषां मीमांसामूलतया मीमांसारूपत्वात्तन्मीमांस्यवेदादिप्रमाणचतुष्टयतदविरोधव्यवस्थापनीयसकलशास्त्राणामध्ययनपूर्वकं तैः सर्वसन्देहनिरासतदुक्तानुष्ठानतथातदुपदेशादिभिः ।

तत एवाऽऽहुर्निबन्धे शास्त्रार्थप्रकरणसमासौ श्रीमदाचार्यचरणाः—वेदरामायणादिभिर्मुख्यभक्तिमार्गतदुपयोगिब्रह्मवादैकनिर्णयम् । तद्यथा—

"अर्थोऽयमेव निखिलैरपि वेदवाक्यै
रामायणैः सहितभारतपञ्चरात्रैः ।
अन्यैश्च शास्त्रवचनैः सह तत्त्वसूत्रै-
र्निर्णीयते सहृदयं हरिणा सदैवे"ति ।

श्रीमदाचार्यचरणैस्तावद्वेदरामायणादिप्रमाणगणग्रहणेनैव सर्वसन्देहनिरासद्वारा भगवद्धर्मो जगति प्रवर्तितः । तयैव रीत्या यदीदानीमपि तत्र तत्र सर्वसाधारणप्रसिद्धवेदरामायणमहाभारतपञ्चरात्रमन्वादिभिस्तात्पर्यनिर्णयलिङ्गानुगृहीतैः प्रमाणचतुष्टयाविरोधव्यवस्थितैः स्वसिद्धान्तव्याख्यानोपदेशादयः प्रवर्तेरन्तर्हि नूनमद्यैव

स्वधर्मप्रवृत्तिः सकललोकश्रेयस्करी सर्वत्र सम्पद्येत । परमानभिज्ञजनमूर्धन्यानां ते ते आक्षेपा—यथा सत्सम्प्रदाया अपि वेदबाह्यपाषण्डिमतवत्स्वार्थप्रतिष्ठादिलालसया कल्पिता दुराग्रहग्रस्ततयाऽन्तर्वस्तुशून्या मतविशेषा एव, न्यायादयस्ते सर्वेऽपि तथा तथा, तद्व्याख्यानादिभिः साङ्गोपाङ्गसनातनधर्ममुख्यस्वरूपनिरूपणमुखेन तदवरमकक्षाविश्रान्ततया मुख्यभक्तिमार्गग्रहणे सति समूलं विलीयेरन् । तथा सति श्रीमद्भगवद्भागवतशास्त्रादिना तत्र तत्राऽभिष्टूयमानं श्रीमदाचार्यचरणस्वरूपञ्च लोकाः प्रस्फुरत्तमं पश्येयुः ।

तस्माद्विद्वन्मण्डनाध्ययनाध्यापनपरिशीलनादिना वि[illegible]त्वेव विशेषतः प्रवर्ततामप्रतिहतप्रचारः सर्वतोऽपि साकारब्रह्मवादस्तथाऽध्यवसीयतां व्यवसीयताञ्चाऽपि तथा साम्प्रदायिकैरिति सानुरोधमेतद्विज्ञाप्यते ।

अधुना तु तादृशस्य विद्वज्जनैकरसनीयस्य तदेकविहेयविशेषस्य तदितरदुर्भरस्याऽपि श्रीमदाचार्यचरणसिद्धान्तस्य भगवदिच्छया मूर्खपर्यवसानं जातमिति श्रीमदाचार्यचरणश्रीमत्प्रभुचरणानां साक्षाद्ग्रन्थानुशीलने निरस्ते तदनुवादादिनैव च यथाकथमपि तद्ग्रहणे सर्वथैव नूनमद्यत्वेऽन्ययितस्वरूपस्तत्सिद्धान्तः, प्रत्युत परितोऽपि प्रवृत्तहासरासः कस्य वा सचेतसो हृदयं न शतधा नयति, केषां वा प्रेक्षावतामहृदयङ्गमीभूय तदभिरुचिप्रवृत्तीं नाऽभिरुणद्धि ।

तथाहि—भगवत्प्राप्तिस्तत्साक्षात्साधकमुख्यभक्तिश्च भगवदनुग्रहैकसाध्यतया प्रमेयबलरूपा, न प्रमाणोक्तैः प्रमाणबलरूपैः साध्येति, श्रीमदाचार्यचरणैश्च श्रीमद्व्रजसीमन्तिनीनां फलतन्मार्गयोरेव प्राधान्येन प्राकट्यं कृतम्, तत्रैव सकलशास्त्राणां तात्पर्यपर्यवसानं च प्रदर्शितमिति, व्रजपतिरतिर्यथा व्रजस्थानामुत्पत्त्या चोपपत्त्या च प्रमाणास्पृष्टा, तथैवेदानीमपि श्रीमदाचार्यानुगानाम् । तेनाऽस्मिन् सिद्धान्ते पाण्डित्याद्यनुपयोगः । एवञ्च वेदादेः प्रामाण्यादिस्वीकारस्तच्छ्रद्धा च स्नेहैकरसाच्छुद्धिपुष्टिमार्गाद्बहिःशायैव । मर्यादा हि सा । मर्यादा च पुष्टौ चाण्डालोदकस्पर्शप्रायेत्याद्यपसिद्धान्तराशीनुद्भावयन्तः श्रीमदाचार्यचरणश्रीमत्प्रभुचरणग्रन्थानपि प्रमाणपूरपूर्णानस्पृश्यतयैव परिहरन्ति, न श्रद्दधते, नाऽऽद्रियन्ते, नाऽपेक्षन्ते च । तथा सति कुतस्तरां वेदरामायणादिप्रमाणग्रन्थादरस्तेषु । कुतस्तरामपि च श्रीमदाचार्यचरणाभिप्रेता सार्वत्रिकी तत्सिद्धान्तप्रवृत्तिः । श्रीमदाचार्यचरणविरोधान्मार्गबहिर्भूता यूयमेव तथा परिहर्तव्या इति बलवद्गृहीतकण्ठास्तु—प्रमेयबलसाध्यस्य प्रमाणबलेनाऽत्यन्तविरोधात्प्रमाणोपपादितो यः स स्वसिद्धान्त एव न भवति, किन्तु प्रमाणच्छायामपि परिहृत्य प्रवर्तमानः शुद्धस्नेहैकरसो यः स स्वमार्ग इत्यास्थाय ब्रह्मवादादिषु विरुद्धांशबुद्ध्या तत्परित्यागेन तावन्मात्रांशे तत्परिग्रहमाहुः । अन्याश्च तदुपकरणभूतास्तास्ता उत्प्रेक्षाः प्रवर्त्य तदुपष्टम्भन्ति, भजनानन्दोत्कर्षं निरूपयन्तोऽपि प्रमाणस्पर्शपरिहारेण सर्वा अपि मर्यादा अनपेक्षमाणाः समस्तसदाचारोच्छेदस्वैराचारयोः पर्यवसिताः परिणामतो विषयानन्द एव भजनानन्दं पर्यवसाययन्ति, साधयन्ति च विषयानन्दरूपान् स्वार्थान् । ततश्च शिष्टैरपरिग्रहप्रसङ्गो राज्ञाऽपि च निग्रहप्रसङ्गः । तेन च सर्वथाऽपि सम्प्रदायप्रमोष एव प्रसक्त इत्यहो बत महत्पापं कर्तुं व्यवसिता वयम् । विषयानन्दलोभाद्यदन्तुं स्वमतमुद्यताः !!! हरि हरि ! शान्तं पापम् !! अपहतममङ्गलम् ।

ब्रह्मवादं विना मुख्यभक्तिमार्गभजनीयत्वेन विवक्षितस्वरूपं ब्रह्मैव न सेत्स्यति, किमुत मुख्यभक्तिमार्गप्रवृत्तिरिति हि ते न जानन्ति । प्रमाणोपपादितो यः स स्वसिद्धान्त एव न भवति । प्रमाणातीतः शुद्धस्नेहैकरसो यः स स्वसिद्धान्तः । प्रमाणांशपरित्यागेन स्नेहांशमात्रे च तदादर इति तु प्रलयान्धकारसन्धायी प्रबलतमोऽयं महाप्रमोहाभिभवः । हा हन्त हन्त ! श्रीमदाचार्यचरणश्रीमत्प्रभुचरणवचनेऽपि नष्टानामुक्तानुक्तदुरुक्तचिन्तेत्यहो अब्रह्मण्यमब्रह्मण्यम् । स्नेहांशस्याऽपि तत्र प्रमाणपूर्वकमेवोपपादनमिति तु क्व तेषां बोधः । तथैव प्रमाणमेवोपपादितस्य ब्रह्मवादस्य "सति कुड्ये चित्रमि"ति न्यायान्मुख्यभक्तिमार्गसिद्धिं प्रति प्रधानाङ्गतया मुख्यभक्तिमार्गेणैक्यम्, कुतस्तद्विघटनम्, येन प्रमाणांशपरित्यागेन स्नेहांशमात्रादरः सम्भवेदपीत्येतदपि तैरनवबुद्धमेव । स्नेहांशस्य शृङ्गारैकरसतया तत्र स्वरूपं विवक्षितमिति समस्तमर्यादोच्छेदेऽनधिकारिणां प्रस्तुताऽसद्बुद्धोभकत्वेन सदाचारोच्छेदस्वैराचारप्रसङ्गाभ्यामुक्तया रीत्या सम्प्रदायविलोप एवाऽऽरभ्यते न तत्परिहर्तव्यपि स्वार्थान्धतया ते नाऽनुसन्दधति ।

तस्मात्तन्मोहात्याहितपरिहाराय सम्प्रदायप्रमोषाप्रसक्तये सिद्धान्तस्वरूपसंरक्षणाय तत्प्रमोहन्यायेनाऽन्येषु प्रमाद्यनुत्पत्तये विद्वन्मण्डनस्य सुलभप्रवेशत्वाय च सकलशास्त्रसमन्वयसिद्धं यादृशं श्रीमदाचार्यचरणसम्प्रदायस्वरूपं या च तत्र हेतुहेतुमद्भावापन्ना शृङ्खला तदुद्घोषणाय विचार इदानीमावश्यकः। साकारब्रह्मवादावान्तरविचाररूपश्चायं भविष्यति । तत्प्रमेयबलप्रमाणबलयोः स्वरूपतस्सम्बन्धनिर्धाराय श्रीमदाचार्यचरणसिद्धान्तसरणिसुधां किञ्चित्प्रपञ्चेन पुरः परिवेष्यमाणामास्वादयन्तु सुधियः सज्जनाः, संरक्षन्तु च श्रीमदाचार्यचरणश्रीमत्प्रभुचरणानामाज्ञानुसारेण सन्मार्गमित्याशास्महे ।

तथाहि–श्रीमदाचार्यचरणैस्तावत्प्रमाणानुरुद्धः प्रमेयमार्गः प्रकटीकृतः । "वेदाः श्रीकृष्णवाक्यानी"ति प्रमाणाङ्गीकारेण तद्व्याख्यानादिना च पुष्टिमार्गस्य स्थापनं कृतम् । पुष्टिश्च भगवदनुग्रहः । स च स्वतन्त्रो, न पराधीनः । भगवत्सम्बन्धी यतोऽयमनुग्रहः । देवान्तरसम्बन्धित्वे तेषामनीश्वरत्वादिना तान् प्रमाणोक्तपूजादिसाधनैः सन्तोष्य तदनुग्रहः शक्यः साधयितुम् । भगवतस्तु–"ऐश्वर्यस्य समग्रस्य वीर्यस्य यशसः श्रियः । ज्ञानवैराग्ययोश्चैव षण्णां भग इतीरणे"त्यादिना निरवध्यैश्वर्यादिप्रतिपादनमस्ति । तस्याऽनुग्रहः सैश्वर्यादिना उपलक्षणविधया स्वकीयैः साधनान्तरैश्च साधयितुं सर्वथाऽप्यशक्य एव । उक्तञ्च "नमो भगवते तस्मा" इति निबन्धाद्यपद्यव्याख्याने साधननिष्कर्षमुपनिबध्नद्भिः श्रीमदाचार्यचरणैः–"भगवति जीवैर्नमनमेव कर्तव्यम्, नाधिकं शक्य" मिति सिद्धान्तः । "किमासनं ते गरुडासनाय किं भूषणं कौस्तुभभूषणाय । लक्ष्मीकलत्राय किमस्ति देयं वागीश किन्ते वचनीयमस्ती"त्यादिवाक्यैरिति । तस्मात्प्रमाणादिभिरपराधीनः किन्तर्हि स्वाधीनो भगवदनुग्रहः । स्वयमेव स्वं साधयेत्तादृशः । न साधनान्तरसाध्य इति यावत् । स च स्वैकसाध्यफलं प्रति साधनमिति मार्गः । पुष्टिश्चाऽसौ मार्गश्च पुष्टिमार्गः । यश्चाऽयं पुष्टिमार्गः, स एव प्रमेयमार्गः । "प्रमाणे बुद्ध्या फलम् । प्रमेये तु वस्तुनः शक्त्या फल"मिति प्रथमस्य नवमे "त्रिभुवनकमनं तमालवर्ण"मित्यस्य श्रीमत्सुबोधिन्यां स्थितम् । पुष्टिश्च वस्तुतो भगवतः शक्तिः । तया च फलमिति पुष्टिमार्गस्य प्रमेयमार्गता ।

तस्य प्रमाणानुरुद्धता च न प्रमाणमार्गता । "नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुतेन । यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा विवृणुते तनूं स्वा"मिति प्रमाणमार्गस्य भगवत्प्रापकत्वनिषेधपूर्वकं वरणात्मकवस्तुशक्त्या भगवल्लाभात्मकफलसिद्धिश्रावणेन प्रमेयमार्गे प्रमाणमार्गताया अत्यन्तविरुद्धतया प्रमाणमार्गत्वशङ्काया एवाऽनुदय इति । किन्तु प्रमाणेन तादृशप्रमेयमार्गस्याऽनुपपादने प्रमाणं विना केवलं कपोलजल्पनयैव प्रमेयमार्गस्य साधने अप्रामाणिकत्वात्पाषण्डत्वशङ्का स्यात् । तन्मार्गवक्तुरनाप्तत्वञ्च प्रसज्येत । प्रमाणेनाऽनुपपादने वक्तुस्तादृशज्ञानलाभे कः प्रकारो येन विवक्षितमार्गसिद्धिरिति । तथा सति प्रेक्षावत्प्रवृत्तिप्रतिबन्धेन प्रमेयमार्गप्रवृत्तिर्दुर्घटैव । तेन मार्गप्रवृत्तिसौकर्यार्थमप्रामाणिकत्वपाषण्डत्वशङ्काव्युदासपूर्वकमेव प्रमेयमार्गः स्थापनीयः ।

किञ्च, बोध्यत्वान्मार्गस्य प्रमाणानाञ्च बुद्ध्यनुग्राहकत्वात्सौकर्यं द्वितीयम् । "मानाधीना मेयसिद्धि"रिति सिद्धान्तात् ।

अपरञ्च–प्रपञ्चे हि प्रमेयमार्गस्य प्रवर्तयिष्यमाणतया प्रपञ्चस्य च "प्रकृतैतावत्त्वं हि प्रतिषेधती"ति परिच्छिन्नताबोधनात्, "एतावानस्य महिमे"त्यादिना च परिच्छिन्नताश्रवणान्मर्यादापन्नत्वम् । "यावन्तो यमभिर्बद्धा वहन्ति बल्मीवितु"रित्युक्त्या च तत्तन्नियमानतिक्रमरूपमर्यादानुपन्नत्वमिति "परप्रसिद्ध्या परो बोधनीय" इति न्यायेन नियतं प्रमाणेनैव बोधनीयतया तद्बुद्धिसौकर्यद्वारा मार्गप्रचारे सौकर्यं तृतीयम् । प्रमाणानतिक्रमो हि मर्यादैवेति ।

अपि च "निरोधोऽस्यानुशयनमात्मनः सह शक्तिभि"रिति निरोधपदार्थविवेचने भक्तानामुदारार्थमानुकूल्येन या भगवतः स्थितिस्तदनुशयनम्, स एव च निरोधपदार्थ इत्याकरेषु स्थितम् । आनुकूल्येन च

र्वत्र ही'ति
तीनामब्रह्म-
कारेणोभ-
भेदादिति
इत्यभिप्रेण
पञ्चमध्यपा-
धनमौपचा-

ाकत्व इति ।
ादिति हेतुना
स योऽयं स

निर्विशेषश्रुते-
ोषां मतमिति
र्थस्तु—जडजी-
स्थानेत्यादि ।
कर्ता, उच्चाव-
पु । एवं स्था-
? सर्वत्र हि
तेपादकानि, न
स्वभावत्वम् ।
र्वत्रिकत्वादिति
पुनरित्यादिना,
दुक्तो विरोधः
ह्म भिन्नं, प्रप-
द्वचनादभेदव-
ात्रादित्ये स-

ातिपादनात् ॥
ाभेदवचनात् ।

**तन्निर्विशेषश्रुतेरिति मतं 'न स्थानतोऽपि परस्योभयलिङ्गं स**
**सूत्रेणौपाधिकत्वे तत्स्वभावत्वं ब्रह्मणो न संभवतीति तच्छुत**
**निरूपकत्वापत्तिरिति निरस्य, पुनरुपहितानुपहितयोर्भेदाङ्गी**
**यरूपत्वं ब्रह्मणि भविष्यतीति तन्मतोपपत्तिमाशङ्क्य, "न**
**चेन्न प्रत्येकमतद्वचनात्' इति सूत्रेण, 'अपि चैवमेक'**
**चाभेदबोधकश्रुतिविरोधनिरूपणेन निरस्य, पुनराकाराणां प्र**
**तित्वात्प्रपञ्चस्य जन्यत्वात्तेषामपि तथात्वात्तेषु ब्रह्माभेदबो**

## सुवर्णसूत्रम् ।

मिति । तात्त्विकोपाधियुक्तम् । श्रुतेरिति । विषय इति शेषः । औपाधि
लिङ्गस्यौपाधिकत्वे । निरस्येति । 'सर्वत्र ही'त्येतत्सूचितेन सार्वत्रिकत्व
निरस्य । प्रत्येकमतद्वचनादिति । ( प्रतिस्वरूपं ) प्रतिवाक्यं 'चायमेव

## हरितोषिणी ।

विषयः । श्रुतेरिति । विषय इति शेषः । मतमिति । निर्धर्मकस्वरूपं ब्रह्म
न्निषय इति शङ्कराचार्यमतमित्यर्थः । तथा च निर्विशेषं सविशेषं ब्रह्मेति
भावः । तदेव निरस्येत्यन्तेन दूषयितुमाहुः—न स्थानतोऽपीति । सूत्रा
वधर्मा भगवति बोध्यन्ते, कुत्र चिन्निषिध्यन्ते, तत्र केचिदविरोधमाहुः—न
सर्वत्र भगवानस्ति; ततश्चास्थूलेऽस्थूलः, अनणावनणुः, उच्चावचकर्तर्युच्चावच
चकाम उच्चावचकामः, पृथिव्यां सर्वगन्धो, जलादावगन्धः । एवं रसादि
नतः परस्य ब्रह्मण उभयलिङ्गमस्थूलाद्युभयलिङ्गमुपपद्यत इति न, कुतः
सर्वत्रैतादृशं रूपं भगवत उपदिश्यते । हि युक्तोऽयमर्थः । भगवत्स्वरूपप्र
त्वनुवादकानि । वैयर्थ्यापत्तेः । औपाधिकत्वे । लिङ्गस्यौपाधिकत्वे । तत
उपाधिस्वभावत्वम् । निरस्येति । 'सर्वत्र ही'ति सूत्रांशसूचितो यः स
हेतुस्तेन दूरीकृत्येत्यर्थः । सविशेषनिर्विशेषब्रह्मणोर्भेदाङ्गीकारे दूषणमाहुः—
निरस्येत्यन्तेन । समाधानमाशङ्क्य निराकरोति—न भेदादिति । न भव
संभवति, भेदात् कार्यकारणेषु सर्वत्र भेदाङ्गीकारात् । प्रपञ्चविलक्षणं ब्र
ञ्चधर्मवद्ब्रह्म भिन्नम् । 'प्रत्येकमतद्वचना'दिति । प्रत्येकं प्रतिस्वरूपमतः
चनात् । 'अयमेव सः योऽयमेवमेक' इति 'स यश्चायं पुरुषे यश्चास

## गङ्गाधरभट्टी ।

न स्थानत इति । स्थानभेदेनोभयलिङ्गवत्त्वमिति चेन्न, सर्वत्रैव तथा
न भेदादिति । पूर्वमुक्तन्न युक्तमुभयोर्भेदादिति चेत्, न; प्रत्येकवाक्येन
एके शाखिनः स्पष्टमेवमभेदमधीयत इत्यभिप्रेत सूत्रार्थः ॥

सावधिकत्वं स्वीक्रियते, तथा तयोरप्यस्तु । किञ्च स्वकारणसमवायः स्वसत्तासमवायो वाऽऽविर्भाव इत्याशङ्कामिरस्यन्नाह **तिरोभावश्चेति** । तिरोभावश्चार्थः । तथा सति घटोन्मज्जनप्रसङ्गात्तदङ्गीकार इति भावः । समवायनित्यतया च न द्वितीयः पक्षः । सम्बन्धत्वविशिष्टस्यानित्यत्वे घटत्वविशिष्टस्यैवानित्यत्वमस्तु, सम्बन्धत्वाकल्पनं च तिरोभाव इत्यस्तु, एवं न्यायनयेनापि घटादेरेव सावधित्वमस्त्विति सिद्धान्ते प्रविश्य पूर्वपक्षी न्यायसम्मतामुत्पत्तिमपि न मन्यते । उत्पत्तेरतीन्द्रियत्वेन प्रत्यक्षाभावादनुमानादेरप्रयोजकत्वात् । क्षणत्वस्य नवीनरीत्याऽतिरिक्तत्वे तत्सम्बन्धमात्रस्यातिप्रसञ्जकत्वात् । व्यञ्जकस्यैव स्वत्वघटनायामुत्पत्तित्वमेवास्त्वौपाधिरस्तु । न चैवमपि, प्रत्यक्षादिप्रमाणाभावादननुगतक्षणत्वस्यैवाननुगतोत्पत्तित्वस्यानङ्गीकारात्, उत्पन्नत इत्येव प्रतीतेः । कस्तर्हि तत्प्रतीतेः प्रतीकार इति चेत्, प्रागभावप्रतियोगित्वादिकमेव प्रतीतेर्विषयोऽस्तु । किञ्च प्रागभावस्थानीयो ध्वंसस्थानीयो वा तिरोभावो न वक्तुं शक्य इत्याह **न चैकुमिति** । **ध्वंस्त** इति भविष्यतामुपलक्षणम् । **रूपवत** इति । योगिनां तत्त्वज्ञानमन्तरेण ब्रह्म नोपलभ्यते, निर्विकल्पकैकविषयत्वात् । रूपं धर्मस्तद्विशिष्टं तु सविकल्पकवेद्यम् । **सैत** इति । वस्तुमात्रं योगिप्रत्यक्षविषयो भवत्येवेत्याशयः । अन्यथा योगिप्रत्यक्षस्यातीन्द्रियाकाशादिसाधारण्याद्रूपवत्त्वस्य योग्यतांशमप्रवेशाद्यथाश्रुतार्थाग्रहणात् । अत एवोद्भूतरूपवतो महत इत्यादि नोक्तम् । तस्मादलौकिकप्रत्यक्षसामग्रीपरो नायं ग्रन्थ इति ध्येयम् । वस्तुतस्तु योगजधर्मो रसं न चाक्षुषयतीति यो यदिन्द्रिययोग्यस्तज्जातीयविषयताया नियामको योगजधर्म इति पक्षधरग्रन्थेऽभिधानात्तदभिप्रायकमिदमुक्तमिति युक्तम् । ननु प्रमाणाभावोऽसिद्धः, 'अनागतमतीतं चे'ति प्रमाणसद्भावादिति वादिनं प्रति वैपक्षिकप्रमाणं प्रत्यवस्थापयति **प्रजाश्चेति** । तथा च सम्यक्तत्त्वज्ञानसाहाय्येन ब्रह्मत्वेनैव पश्यन्तीत्येव वादिप्रोक्तप्रमाणार्थोऽस्तु । नैतावता घटत्वादिप्रातिस्विकधर्मपुरस्कारेण प्रत्यक्षमुपपादयितुं शक्यते । अथवा स्यादेतत्, वस्तुसत्त्वे तिरोभावदशायामपि विषयघटितमहदुद्भूतरूपादिसामग्रीसत्त्वात् सर्वेणैव घट उपलभ्येत । सर्वान् प्रति तिरोभावे योगिनं प्रत्यपि तिरोभावोऽस्त्वित्याशङ्कां वारयति **नचैवमिति** । योगिनं प्रति तिरोभावे प्रमाणाभावादित्यर्थः । प्रत्युत 'अनागत' मित्यादि तत्तत्प्रत्यक्ष एव प्रमाणमुपदर्शितमिति भावः । अथ कथं तदनुपलम्भापादनमिष्टापत्तेरित्याशङ्क्येष्टापत्तिमनिष्टापरिदर्शयति **प्रजाश्चेति** । जन्यधर्माणः । तुल्यकालीना इत्यार्षम् । आर्षदर्शनाय आर्षज्ञानस्य प्रमाणान्तरत्वेन वक्ष्यमाणत्वात्, यद्विशुद्धसाक्षिजन्यमामनन्ति । अलौकिकदर्शनाय मुचुकुन्दस्यान्यस्य वा योगित्वात्तस्य कालस्त्वादिना दर्शनमुक्तप्रमाणस्य विषयः । तथा न प्रातिस्विकरूपेण घटत्वादिना दर्शनमापाद्यं दुरुद्धरमेवेति भावः । अत्रायं संग्रहः—उक्तरीत्या आविर्भावतिरोभावोत्पत्तिविनाशाः सर्वे एव मा भूवन्, विकल्पानां दुरुत्तरत्वात् । किन्तु यथोपलब्धस्वभावः प्रपञ्चः स्याद्वादोत्तिद्ध एवास्तु, अविद्याविलासो वा, अनिर्वचनीयाकस्मिको वा, कार्यकारणभावादिव्यवस्थाया आविर्भावादिनिरूप्यत्वात्तदभावे नियतव्यवस्थाऽसम्भवात् । अत्रैव तु परिमार्गितव्यम् । इदमेव नाशादिप्रतीतेर्भ्रान्तत्वम्, अन्यथा क्वापि तदप्रसिद्धौ भ्रमायोगात् । किन्त्वारोप्यविषयसंस्कारोऽनादिधाराया नियामकस्तथैवानिर्वचनीयभ्रान्तिमसत्ख्यातिं वा प्रपञ्चगोचरां परिकल्पयिष्यतीति । अथवोत्पत्त्यादिप्रतीतिराविर्भावादिविषयिण्येवेति तदर्थः । परस्य वादिनो भ्रान्तिरिति प्रतिवादिनि प्रत्यवतिष्ठमाने ब्रह्मणोऽप्येवमसत्त्वं प्राप्तमिति परस्परदूषकानां कारण्यमुपलभ्य ब्रह्मगुणवादप्रवाहे तान् प्रापयन्ति **प्रोक्त** इति । इत्याविर्भावपूर्वपक्षरहस्यम् । गुणवादः स्वरूपप्राकट्यात्मक इति स्वयमाहुः **अत्रोच्यत** इति

**'स्वरूपं हरिरेवात्र निजहस्ततरेणुना । तरङ्गयुक्तिमुक्ताभी रञ्जितेन हि वाक्पतेः । प्रसादेनैव लभ्योऽसौ लक्षणं तु विवक्षितम् ।'**

आविर्भावे उत्पत्तित्वं, न वा, ज्ञाततात्वं न वेत्येवमाद्याः संशयाः, आविर्भावत्वं, न वेति, नित्यो न वेति च । अत्र 'न वे'ति सर्वत्र संशयाकारो ग्रन्थाभिरूढस्तान्त्रिकाणाम् । वयं तु तद्वांस्तदभाववान्वेति स्फुटाकारं ब्रूमः । नमर्थे विशेष्यान्वितभावकोटेरन्वयासम्भवादित्यवधेयम् । संशयलक्षणं तु तृतीयस्कन्धीयविवृतिरीत्या वक्ष्यमाणमिति बोध्यम् । **अनुभवविषयत्वयोग्यत्वमिति** । अत्रोत्पत्तिसंज्ञाभिधेयकाविर्भावस्य द्वितीया-

मन्वानो व्यासाशयमविद्वान् शङ्कते ननु 'नैतेमाऽश्नुते'रिति । सूत्रशकलं तोलयन् किलायमिदमाह । अत्र गिरिराजोऽस्य मुख्याङ्कुरेण प्रणवेन प्रतिपाद्ये समाबभाविति मुख्यान् प्रत्याययन्ति 'अत्रेदमिति । विचारयन्निति । अग्नेः प्रणवस्य सञ्जीवनौषधस्येवाङ्कुराः, भावप्रधाननिर्देशात् । क्षौद्रमिव मधुराः, कोमलाश्च नवो देवा गुणरूपा इत्यर्थः । ते च प्रणवाश्रितोद्गीथादिविद्याविदांवराणां नित्यानुभूयमानसमाधिविषयाः कपिलविनोदास्पदा इव पदार्थाः परषःष्टिसहस्रोत्तरैर्लौकिकैरणुमवैर्न शक्यन्ते निवारयितुं तथैव जीवाः प्रणवाक्षत्रयात्मकाः प्रादुरासन्निति विचारयन् । स्वयमेवेति सम्बन्धः । उत्पत्तिपदार्थव्युत्पत्तिवैचित्र्ये प्राचां सम्मतिं प्रमाणयन्ति तदुक्तमिति । विष्णुस्वामिनां संमतिरिति प्रतिभाति । तं प्रति भगवतोक्तमित्यर्थः । अनित्ये जननेमित्यादि । उत्पत्तिरसतस्सत्तापादकसत्तारूपा यदि तदा जननमिति व्यपदिश्यते । स्वथा जनिस्तु प्रादुर्भावार्थ एवेति नित्ये परिच्छिन्ने पञ्चभूतकिरणसमाजे तत्त्वात्मके तान् समूह्य तत्र निजानुभवविषयतायाः सम्बन्धत्वाङ्गीकारः समागमः । संयोग इति केचित् । अधिष्ठातृत्वे संप्राप्ते यथा कश्चिन्महाराजो मौक्तिकावलिपर्यङ्कस्थितविज्ञानविराजितचन्द्रमणिगणप्रभाप्रच्छादितपर्यङ्काधिरूढो भवति । नित्यौपरिच्छिन्नतनौ । नित्यनिजवैजयन्तीरूपविषयताश्लिष्टोत्तरीयप्रसाधितसज्जसामग्रीसन्निधाने सन्निहितमहामणिरिवेति श्रीमदाचार्यैरस्मान् प्रति व्याख्याय दर्शितमित्याहुः । इति । तदुक्तमिति सम्बन्धः । एवं च विषयतामात्रलक्षणसत्त्वेन प्रपञ्चे विषयविषयिताभ्यां जीवे नित्ये परिच्छिन्नेऽणौ, जीवे 'य आत्मनि तिष्ठन्नात्मान'मिति रीत्या स्वावेश इति वा । प्रेयोविषयितया स्वरूपे तादात्म्यं स्वनिरूपितसंसर्गताश्रयत्वेनाङ्गीकाररूपं प्राकट्यमेव त्रिधेति, न तूत्पत्त्यादिगेदपरं सम्मतिवाक्यमिति निष्कर्षः । वैजयन्तीसम्बन्धिपदार्थपत्रपुष्पमणिकिरणादिसम्बन्धाज्जीवो ज्ञातनिजतत्त्वात्मको भवतीत्युक्तं भवति । ननु पूर्वं वाक्यभेदशङ्कितत्वयात्वमवादीरित्युपालम्भात् सोऽत्र कल्पेऽपीति चेन्न, प्रादुर्भावरूपविशेष्यैक्येण त्रयाणामपि सिद्धान्तनिष्कर्षात् । यद्युत्पत्तिरेका स्यात्, तथा सत्यनेन तस्या एव प्रकारभेद उक्तो युज्येत । प्राकट्यं तु प्रकारभेदेऽपि स्वरूपविषयताया ऐक्यादेकविधमेवेति प्राकट्यमित्येव चकारत्रितयस्य योज्यम् । तेन प्राकट्यमेकमेव । विशेषभेदात्सा जननादिरूपोत्पत्त्यादिभेदैर्विशेष्यत इति तदर्थो द्रष्टव्यः । तदुक्तं बोधस्त्वमिति । दृष्टान्ते तु सुबोधम्, तथापि दृष्टान्तो बोद्धृप्रत्ययार्थम् । यादृशो बोद्धा तादृशो दृष्टान्तधर्मः स्फुरति । सहृदयस्तु चन्द्रनिष्ठाह्लादजनकतावच्छेदकं चन्द्रमुखोभयसाधारणं प्रतिपद्यते, तच्च विलक्षणविषयतारूपं सादृश्यं भेदाभेदसाधारणं च । तत्र दृष्टान्ते पुरुषान्तरेण भेदेन गृहीतधर्माणां तत्रैव दार्ष्टान्तिके चानन्दजनकतावच्छेदकमनुगतं सहृदयः परिपश्यतीति क्षुमाक्षर्यादिव एवंविधिविशेषस्य बोद्धुर्वैशिष्ट्यस्य च प्रत्याख्यातुमशक्यत्वात्तादृशमर्थं दृष्टान्तपुरस्कारेण श्रुतिर्बोधयति । तत्र यथायथं सामान्यबोद्धृविशिष्टबोद्धृपुरुषयोर्वाक्यार्थबोध इत्येतत्सर्वं मनसि कुर्वन्तः सूत्रकारमुपस्थापयन्ति प्रकृतेऽपीति । 'अधिकं त्विति । अधिकविषयतावत्त्वं महत्त्वम् । भेदावदिति । गीतासु द्वादशाध्याये भगवदुक्तेत्यर्थः । सैन्तुष्टाज्ज्ञानभक्त्योर्विषयीभूतात् । 'आश्चर्यव'दिति श्रुतेः, 'मत्प्रसादा'दिति स्मृतेः । आनन्दप्राकट्यं श्रुतिरूपासु, अत एव शुकादिषु, अन्यथा तद्वर्णनानुपपत्तेः । भावदर्शनं तु नात्रापि, ज्ञानप्रधानत्वात् । आनन्दानां लक्ष्म्यंशानां वा प्राकट्यम् । मुक्तानां पुनः प्राकट्यमपि फलकोटौ सम्भावयन्तो मुक्तोपसृप्यत्वं दर्शयन्ति स्वैर्गुणेत्यादि । एते सखाय एव मुक्ताः, शुकादितोऽपि विलक्षणाः । शुके श्रवणकीर्तनं सर्वदा, श्रुतदेवप्रसङ्गे सख्यं च । सनकादयश्च । एवं देवर्षिप्रमृतयः । तैरुपसृप्य इति । लीलानुकरणं वा गुणेत्यादिनोक्तम् । योगं प्रसादं सर्वतो नित्यतृप्तिलक्षणम् । तदुक्तम् नैं शोचतीति । चिन्ता कापि न कार्येति । न भोगसामग्रीसम्पादने लौकिकपदार्थमाकाङ्क्षति । सेर्वैः सर्वेषु जनादिष्वपि । तेनैव भोगसामग्रीं सम्पादयति । भगवानपि तत्त्वे तत्त्वान्तराणां प्रवेशमनुमनुत एवेति फलत्वेनेत्युक्तं भवति । एवं निरपेक्षत्वमात्रेण न कृतार्थतेत्याहुः भक्तिलेशेति । भगवच्चरित्रचिन्तितचित्तस्यप्रवेशानन्तरमित्यर्थः । तदनन्तरं मच्चरणारविन्दे प्रविशतीत्याह विजयेरथेति । दशनामातिरिक्तनामकरणम् । स्व एव भगवान् कृष्णतां प्राप्तो विजयार्थम् । भगवतोऽपि नामकरणं वादिविजयार्थम् । सख्यस्य चावमतिजयो मत्स्यवीर्यादित्वद्वारा प्रकटनम् । पार्था अप्यातपत्रादिधारणेन, पारस्पर्य सख्यस्य विजयोपहारसमर्पणेन दर्शयन्ति तदाहुः प्रवेशानन्तरमिति । अर्जुनस्य भगवत्येव प्रवेश इत्यभिसन्धिः, साक्षात्सख्योमुख्ये, परम्परया

[१७४] विहितो [१७५] निरवधिरसभावो भाविलीलासम्बन्धी, स एवाङ्कुरो रतिरूपो यासु । नैतासां रसुत्पादकं सत्यन्तरमन्तरास्ति, किन्तु लोचनमात्रेति मुग्धात्वमुक्तम् । अत्र शाद्वलभूमौ हरिताङ्कुरायां प्रियाः प्राप्ताः, प्रभुः पुनरत्युत्तरां विपुले च कलिन्दजापुलिने रासवलयाकारे नभोवलय इव [१७६] यमुनानीरावर्तसमुद्भूताः पाययित्वा स्वयं च निपीय विराजमानः श्रीमत्स्वामिनीनां स्वाभिलषितसुधया पूर्णः क्वाहं रसं निधिमिव स्थापयामीति विभावयन्नेव व्रजवरवधूभी रचितां निजसमाजात्मककदम्बिनीं लताखण्डवीथीमिव पश्यन्, निजा या प्रिया नाम सुवर्णवादिनी प्रसादरूपेव मुरलिका, तस्या अव्यक्तमधुरो गुप्तसकार आकारान्तो विभावयितुमशक्यो नितरां समृद्धो यो गर्जितस्तेनानन्दयति । प्रियानामध्वनिश्रुत्या तद्भावापन्नाः सर्वाः करोतीति कुमारः कौमारभावाविष्टः श्रीमद्गोकुलचन्द्रमाः श्रीमान्व्रजजलधिवारिधिः सुधां पूर्वोक्तां ववर्ष, पुनः श्रीगोवर्धनपरिवृढो भूत्वा सर्वत्रैव लोकान्तरव्यापितया वर्षिष्यति सुधाधोरणिमादौ प्रादुर्भाव्य कूजितेन तदनु 'बर्हापीड'मित्यादिना निजलोकव्यापकसुधावृष्टिं करिष्यतीति न ज्ञातुं शक्यम् । यत इदं पद्यं स्वयमेवावातारयत्, ततः पूर्वं वर्णनाशक्तिवज्ज्ञानशक्तेरपि तिरोभावादिति भावः । मर्यादेयं भक्तिमार्गमर्यादया । अत एवाहुः श्रवणमिति । श्रवणादिप्रकारेणेत्यर्थः । [१७७] तेनैव सर्वं पुष्टिः पुष्टिपुष्टिश्चेति । [१७८] विङ्गिति । एषः श्रीगोकुलमार्ग इत्यर्थः । वृन्दावनकलानाथकिरणालङ्कृतो यमुनापरपारतीरोद्भूतप्रांशुपुलिननवघनवीथीप्रस्थमकुञ्जमार्गोऽयमिति भावः । त्रिविधोऽयं मार्गः, स्नेहमयत्वात्केः, शुद्धभावप्रसादाच्चेति तन्मार्गगामिभिः पितृचरणैर्विवृतो निरूपितं, तत्तत्रैवानुसन्धेयमित्यभिसन्धायाहुः [१७९] अलं विस्तरेणेति । मर्यादिकप्रवाहाद्यनुसारिविस्तीर्णमार्गेण तादृशा नो पर्याप्तमित्यर्थः । तेन मार्गेण व्रजान्तर एव प्रव्रजेम तु श्रीगोकुलरमणभूमिकायां भगवता सह क्रीडेदिति भावः । पूर्वं दृष्टान्तमुखेनांशत्वं तत्साधारणमुक्तम्, यद्वेत्यादिना दार्ष्टान्तिक एव सूत्रस्मृतिभ्यामंशत्वमखण्डविषयताविशेषरूपमुच्यते, उभयथापि पूर्वकल्पे बोधवैचित्र्यात्तदंशत्ववैलक्षण्यं प्रतीयते, उत्तरकल्पे सूत्रस्मृत्यादिप्रमाणव्यवहारात्तादृशव्यवहारविषयत्वमेवांशत्वम् । अन्यथा तादृशांशत्वव्यवहारस्य निर्विषयत्वापत्तेः । यथा 'कः प्राण्यात्' 'एष ह्येवानन्दयाती'ति ब्रह्मधर्मप्राधान्येन जीवयतीति व्युत्पत्तिस्तथाऽव्युत्पन्नं पक्षमाश्रित्य तथा भगवता तदनुसारिसूत्रेण चांशत्वं व्यवहृतमिति । श्रुतिरादिर्ययोः स्मृतिसूत्रयोरित्यतद्गुणसंविज्ञानबहुव्रीहिः । अन्यथा तु सौत्रं भगवत्स्मृतिसिद्धं चांशत्वमुपजीव्यान्तर्यामिनियम्यत्वं श्रुत्याद्युक्तम्, तस्य नानुपपत्तिरित्यर्थः । अन्यथाऽपित्वावच्छिन्ने स्वस्मिन् स्वनियम्यत्वानुपपत्तेरित्याशयः । अथांशत्वप्रसिद्धौ प्रमाणप्रसिद्धिरित्यन्योन्याश्रयादुपचरितमंशत्वम्, अंशा इवांशा इति, सादृश्यं च स्वप्रयोज्यत्वादिकमेवेति चेत्, तर्हि यत्र क्वचिदंशत्वप्रसिद्धिरवश्यं वाच्या, अन्यथा सादृश्यस्यैवासम्भवात् । चेतनासादृश्येनैव भगवद्वाक्यमिति चेत्, चेतनाया भगवदीयव्यतिरिक्ताया अनभ्युपगमेनाभेदे सादृश्याभावात् । अभेदमादायैव सादृश्यमिति चेद् अतिकौशलमिदम् । यतः किं तेन सादृश्येन, येन बलात्तथा व्याख्यायते, यथा भगवति स्वाभेदस्तथा जीवेऽभेदः, विशेषतस्त्वपि नरे प्रकटित इति हि सादृश्यव्याख्या । अंशत्वे किमायातम्? । तथा च तत्प्रसिद्धिरन्वेषणीया मनीषिणा । विस्फुलिङ्गा इति चेत्, किममी स्थूलारम्भका आरभ्या वा । नाद्यः, अवयविनोऽनारम्भकत्वात्, नान्त्यः, आरम्भकाणां विभागाभावात्, प्रकृतासङ्गतेश्च, विस्फुलिङ्गपदेनांशत्वाप्रतिपत्तेश्च । किञ्चाशान्तरवत् ममांशस्त्वसान्ममैवेति । प्रतिबिम्बोऽपि विषयताविशेष एव । जीवलोकोऽपि नाविद्या, किन्तु दहर एव । न हि अविद्यायां स्वरूपतो जीवो ऽभेद्यते । एतेन सत्ववयवाविक्ता एवांशाद्व्यपदेश्याः, द्रव्यसामान्यवैचित्र्यात् । स्थूलवह्निस्थूलेन्धनसंयोगनिमित्तकं तेजोन्तरमिवोत्पद्यन्तां ते, तथापि जीवरूपचिदंशसाधारणमंशत्वं तु दुर्घटम्, तत्सम्बन्धाभावात् । ज्ञाने चांशत्वव्यवहारो विषयताकृत इति सर्वतन्त्रसिद्धान्तः । यत्रान्ये विषयास्तत्र त एवांशाः । स्वविषयत्वे स्वविषयतैवांशत्वमिति हि भगवदभिसन्धिरित्यलं पल्लवेन । नन्वंशत्वं, तथापि लोकेऽदर्शनादंशिनि तत्प्रवेशानुपपत्तिरित्याशङ्कते [१८०] नन्विति । [१८१] तयोर्बहिःस्थत्वान्तरस्थत्वयोः । प्रमाणन्तु 'न चास्यान्तर्बहिर्यस्ये'ति न बहिर्भूमंशभावेनापि । न वा जीवब्रह्मतादशायां ब्रह्मास्पृष्ट्वैव जीवस्तिष्ठति, स्थित्यनुपपत्तेः । न वा

तज्जातीयत्वं विषय इति चेद्, न, नासाप्रत्यक्षात्, अनुमानस्याप्रयोजकत्वात्। तज्जातीयत्वं विषय इत्यपि मन्दम्, घटत्वाद्यन्यतमत्वादेस्तु आदेस्तत्र केनापि प्रमाणेनाविषयीकरणात्, अनुमानस्य चाप्रयोजकत्वात्। अन्यथाऽऽद्यघटादन्यघटो विलक्षण इति पूर्वपूर्वघटवैजात्यान्तरप्रसङ्गेनानन्तजातिकल्पनापत्तेः। एतेन पीलुपाकवादिनः प्रत्याख्याताः। शरीरादाववयवपूरणं तु प्रत्यक्षासिद्धम्। यदिदमवस्थेति व्यपदिशन्ति, तदपि न द्रव्यान्तरत्वापादकम्। यथाऽनया प्रतिबद्धा यथावस्थितपुष्पादाववयवपूरणकल्पना। न वा द्रव्यान्तरत्वम्। न चैवं पृथिवीघटयोरप्येकत्वे सांख्याभिनिवेशः शङ्क्यः, घटत्वादेः प्रत्यक्षसिद्धत्वात्तत्तदवच्छिन्नयोर्भेदात्, समनियतावच्छेदकावच्छिन्नयोरेवाभेदात्। यथा घटत्वकम्बुग्रीवादिमत्त्वावच्छिन्नयोः पृथिवीत्वघटत्वयोः परस्पराभावसामानाधिकरण्याभावेन साङ्कर्याभावेऽप्युपधेयाभेदलक्षणमुपधेयसाङ्कर्यमस्त्येव। पृथिवीत्वावच्छिन्नाभिन्नत्वाद्घटत्वावच्छिन्नस्येति चेत्, तथाप्ययमभेदो न भेदसह इत्येव साङ्ख्यवैलक्षण्यम्। ते हि व्यष्टिसमष्ट्योः सामान्यविशेषभावक्षमं भेदं सामान्यात्मना चाऽभेदं मन्यन्ते। सामान्यं च नाम तादात्म्येनानुगता पृथिवीव्यक्तिरेव, न तु समवायेनानुगतं पृथिवीत्वम्। सिद्धान्ते तु तथ्यायेन सकलकार्यानुगतमूलप्रकृतिस्थानाभिषिक्तं विषयताविशेषलक्षणसत्तात्मना ब्रह्मैवैकविज्ञानवाच्ययात्प्रपञ्चितमिति प्रसङ्गान्मायावादनिराकरणे प्रभुचरणानां नन्विदमारभ्य तर्कचरणोऽयमिति युक्तमुत्पश्यामः। सत्प्रतिबन्दिमुद्भावयन्ति संभवावस्थायापीति। तथात्वं सम्बन्धिनं विनापि सत्त्वम्, तदङ्गीकारो नैयायिकानाम्। तथा सति नियामकत्वाभावादित्यन्वयः। ततोऽतिरेकापत्ताविशेषेनान्वयः। अतिरेकः सम्बन्धिनं विहायावस्थानमिति यावत्। नियामकाभावस्य तुल्यत्वादित्याशयः। तत्समाधानाय नियामकानुसारेण पुनः समवायमादाय जञ्जालान्निस्तार इत्याहुः सूक्ष्मेति। तथा च साङ्ख्यमतप्रवेशः। अत्र तादात्म्येनानुगतोपादानव्यक्तिश्चेतनातिरिक्ता, न तु चैतन्यमित्येकं तन्मतम्। सूक्ष्मरूपेण परिणामिनि कारणे कार्यमित्यपरम्। तत्र प्राथमिकमते ब्रह्मोपादानतयाऽनुगतमिति सिद्धान्तपरिष्कारात्द्वितीयमतरीत्या सूक्ष्मत्वमेवापादितमिति बोध्यम्। सम्बन्धसामान्येनायं नियम इत्याशङ्कते मैवं जन्येति। तद्वत्स्वामिरपि गन्धातिरिक्तेति विशेषणमुपक्षेप्तव्यमित्याहुः अत्रापीति। ननु सम्बन्धत्वं नैकं, गुणत्वं त्वेकमिति चेन्न; सम्बन्धत्वस्याप्यखण्डस्यैकत्वात्, विषयतदात्मकत्वात्, अन्यत्वस्य च भवन्नियमनिविष्टस्याननुगतत्वात् संयोगत्वादिनैव नियम इति चेद्, अस्माकमपि रूपत्वादिनैव भवदभिमतो नियमः पर्यवस्यतीत्याहुः तुल्यमिति। गन्धातिरिक्तेति। साधारणयोग्यतानियामके गुणसत्त्वे द्रव्यसत्त्वं नियामकमिति साधारणनियमे वैयर्थ्यं बोध्यम्। रूपत्वादिना नियमे तु न वैयर्थ्यम्, तद्विशेषणानुपादानादेवेति बोध्यम्। गन्धसत्त्वे द्रव्यसत्त्वस्यानुभवविरोधं दर्शयन्ति मृगमदस्येति। तत्तद्गन्धाश्रयाणामवयवानां गतौ वायुसंयोगादेरन्वयव्यतिरेकसिद्धहेतुत्वात्तत्सत्त्वे विनिगमकाभावेन सर्वावयवानामुड्डीनताप्रसङ्गः कर्पूरादाविवेति भावः। फलानुरोधेन व्यवस्थायां गुण एव कर्माङ्गीकारोऽस्तु, द्रव्यत्वजातेरभावेनैवानतिप्रसङ्गाद्, व्यञ्जकजातिपक्षस्योक्तोत्तरत्वात्। तद्वत्सः कषायादिः। योग्यमात्रवृत्तिगुणत्वेन योग्यत्वमाहुः तेर्गामिति। असङ्कोच इति। चतुर्थकल्पनागौरवापेक्षया गन्धातिरिक्तेति विशेषणमात्रप्रक्षेपस्य लघुत्वात्। यदि च तत्तत्त्वेनैव योग्यत्वान्न रसोपलब्धिस्तदा ममापि रूपादिसत्त्वे द्रव्यसत्त्वमिति रूपत्वादिना विशिष्यैव नियमान्न तद्विशेषणमिति तुल्यं लाघवमित्यर्थः। एवं मणिप्रभान्यरूपत्वेन तत्तद्रूपत्वेन वेत्यपि बोध्यम्। पूर्वं कर्पूरन्यायेनावयवोद्गमः सम्भाव्यते, न तु तरां द्रव्यविशेषे इत्याहुः किञ्चेति। उग्रगन्धस्य चम्पकशिरीषादेः कुसुमस्य। उग्रत्वं स्वाश्रयाधिकदेशवृत्तित्वेन स्फुटतरत्वम्। किञ्च कतिपयावयवास्ततो गच्छन्ति, कतिपये तिष्ठन्ति, कतिपये चागच्छन्ति, तत्र दोधूयमानलतापुष्पाणां सर्वावयवावच्छेदेन वायुसम्बन्धात्सर्वोद्गमो भीमोद्धीतगजानामिव स्यात्। समागच्छद्भिश्चानेकावयवैः पुष्पादिद्वैगुण्याद्यापत्तिः। न हि तावतामेव सम्बन्धं तावत्वानुभवः कल्पयन्नपि प्रसृततराणां वायूपनीतानन्तावयवानां संयोगं प्रत्याचक्षीत। नाप्यदृष्टः पुष्पादेस्तत्परत्वमात्रनिर्वाहकः, विभिन्नजातीयविलक्षणसंयुक्तद्वयारब्धकअन्तरस्येव कस्यचिददृष्टात्तद्विलक्षणस्थलपुष्पान्तरप्रसङ्गसम्भवात्। दृष्टकारणसमाजे तथैवाऽदृष्टस्यापि कल्पनीयत्वात्। फलबलकल्प्यमदृष्टमिति चेत्,

# अकारादिक्रमेण प्रमाणवचनसूची।


| | | |
|---|---|---|
| १६५ | अकथितं च | अष्टा. अ. १ पा. ४ सू. ५१ |
| २५४ | अक्षण्वताम् | भा. स्क. १० अ. २१ श्लो. ७ |
| २३ | अग्निहोत्रं जुहोति | तै. सं. का. १ अ. ५ अनु ९ मे. १ |
| २४५ | अचतुरविचतुर | अष्टा. अ. ५ पा. ४ सू. ७७ |
| ३३८ | अजत्वं पारवश्यं च | ब्रह्मपुराणे |
| १५१ | अजो नित्यः शाश्वतोऽयम् | भ. गी. अ. २ श्लो. २० |
| २७९ | अणिमाद्यैर्महिमभिः | भा. स्कं. १० अ. १३ श्लो. ५२ |
| १९६ | अणोरणीयान् महतः | कठो. व. २ मं. २० |
| २१६ | अत एव प्राणः | ब्र. सू. अ. १ पा. १ सू. २२ |
| १२८ | अत इनिठनौ | अष्टा. अ. ५ पा. २ सू. ११५ |
| २८६ | अतः प्रभवात् | ब्र. सू. अ. १ पा. ३ सू. २८ |
| ७ | अतोऽस्मि लोके वेदे च | भ. गी. अ. १५ श्लो. १८ |
| २२७ | अत्र मां मार्गयन्त्यद्धा | भा. स्कं. ११ अ. ७ श्लो. २३ |
| ४१ | अथ रथान् रथयोगान् | बृह. अ. ६ ब्रा. ३ मं. १० |
| २१६ | अथ यदतः परो दिवः | छान्दो. अ. ३ खं. १३ मं. ७ |
| ३०६ | अथ यदिदमस्मिन् | छान्दो. अ. ८ खं. १ मं. १ |
| २२५ | अथ योऽन्यां देवताम् | बृह. अ. २ ब्रा. ४ मं. १० |
| १२४ | अथ वा सर्वरूपत्वात् | तत्व. नि. शा. श्लो ९ |
| २३९ | अथाकामयमानः | बृह. अ. ४ ब्रा. ४ मं. ६ |
| १२ | अथात आदेशो नेति नेति | बृह. अ. २ ब्रा. ३ मं. ६ |
| ३७ | अथातो ब्रह्मजिज्ञासा | ब्र. सू. अ. १ पा. १ सू. १ |
| ३४३ | अथापि तदभिप्रायम् | भा. स्कं. ३ अ. ४ श्लो. ५ |
| २३९ | अथैते दुःखमेवाऽपि | बृह. अ. ४ ब्रा. ४ मं. १४ |
| २२२ | अथो अमुष्यैव ममार्भकस्य | भा. स्कं. १० अ. ८ श्लो. ४० |
| ११३ | अदर्शनादापतितः | म. भा. पर्व १५ अ. ३४ श्लो. १७ |
| २९३ | अदो यद्दारु प्लवते | ऋ. सं. अष्ट. ८ अ. ८ व. १३ |
| ६२ | अदृष्टं द्रष्टृ | बृह. अ. ३ ब्रा. ८ मं. ११ |

| | | |
|---|---|---|
| २४१ | अदृश्यमग्राह्यम् | मुण्ड. मु. १ खं. १ मं. ६ |
| १७१ | अधिकं तु भेदनिर्देशात् | ब्र. सू. अ. २ पा. १ सू. २२ |
| ३०३ | अधिकं तत्रानुप्रविष्टम् | न्यायः |
| १३६ | अध्यात्मादेशुभम् | वार्तिकम् |
| २५३ | अनन्तरूपम् | कैव. खं. १ मं. ६ |
| २३६ | अनन्तरोऽबाह्यः | बृह. अ. ४ ब्रा. ५ मं. १३ |
| ३११ | अनतिप्रश्न्यां वै | बृह. अ. ३ खं. ६ मं. १ |
| ३३३ | अनन्यचेताः | भ. गी. अ. ८ श्लो. १४ |
| २१६ | अन्तस्तद्धर्मोपदेशात् | ब्र. सू. अ. १ पा. १ सू. १९ |
| ३११ | अन्तराण्डनिचया ननु | भा. स्कं. १० अ. ८७ श्लो. ४१ |
| ११५ | अनागतमतीतं च | भा. स्कं. १० अ. ६१ श्लो. २१ |
| ११५ | अनावृत्तिः शब्दात् | ब्र. सू. अ. ४ पा. ४ सू. २२ |
| १६० | अन्यार्थं तु जैमिनिः | ब्र. सू. अ. १ पा. ४ सू. १८ |
| १७० | अनित्ये जननं नित्ये | विष्णुस्वामिन इति कश्चित् |
| ११८ | अनुच्छित्तिधर्मा | बृह. अ. ४ ब्रा ५ मं. १४ |
| १६६ | अनुज्ञापरिहारौ | ब्र. सू. अ. २ पा. ३ सू. ४८ |
| २२४ | अनुस्मृतेर्बादरिः | ब्र. सू. अ. १ पा. ३ सू. ३० |
| ३८ | अनृतं वै वाचा वदति | तै. ब्रा. प्र. १ अनु. ४ |
| २४२ | अनेकबाहूदरवक्त्रनेत्रम् | भ. गी. अ. ११ श्लो. १६ |
| १६ | अन्यत्र धर्मात् | कठो. व. २ मं. १४ |
| २०१ | अन्यदेव तद्विदितात् | केन. खं. १ मं. ३ |
| ३ | अहृपाप्लुतं निशि | भा. स्कं. २ अ. ७ श्लो. ३१ |
| १९२ | अपरिमिता ध्रुवास्तनुभृतः | भा. स्कं. १० अ. ८७ श्लो. ३० |
| १२ | अपाणिपादो जवनः | श्वेता. अ. ३ मं. १९ |
| १४९ | अपि च स्मर्यते | ब्र. सू. अ. २ पा. ३ सू. ४५ |
| २३४ | अपि चैवमेके | ब्र. सू. अ. ३ पा. २ सू. १३ |
| ७३ | अपि वा तमादेशम् | छान्दो. अ. ६ खं. १ मं. ३ |
| २४२ | अपि संराधने | ब्र. सू. अ. ३ पा. २ सू. २४ |
| ३१४ | अ प्रत्ययात् | अष्टा. अ. ३ पा. ३ सू. १०२ |
| १४ | अप्राणो ह्यमनाः शुभ्रः | मुण्ड. खं. १ मं. २ |
| ९० | अभावविरहात्मत्वम् | न्या. कु. स्त. ३ श्लो. २ |

| | | |
|---|---|---|
| १३८ | अभाषितपुंस्कात्र | अष्टा. अ. ७ पा. ३ सू. ४८ |
| २२४ | अभिव्यक्तेरित्याश्मरथ्यः | ब्र. सू. अ. १ पा. २ सू. २९ |
| ३३७ | अमोहाय गुणा विष्णोः | ब्रह्माण्डपुराणे |
| २२३ | अयमग्निर्वैश्वानरः | बृह. अ. ५ ब्रा. ९ मं. ९ |
| १४५ | अयमात्मा ब्रह्म सर्वानुभूः | बृह. अ. २ ब्रा. ५ मं. १९ |
| २३४ | अयमेव सः योऽयमेव | बृह. अ. २ ब्रा. ५ मं. १ |
| २९३ | अयः शुभावहो विधिः | अम. का. १ श्लो. २७ |
| ३२३ | अयोग्यमिच्छन् पुरुषः | तत्व. नि. भा. प्र. स्कं. ११ श्लो. ३८ |
| ५३ | अयं वै हरयः | बृह. अ. ४ ब्रा. ५ मं. १९ |
| ११७ | अयं हि जीवस्त्रिवृद् | भा. स्कं. ११ अ. १२ श्लो. २० |
| २३५ | अरूपवदेव हि तत् | ब्र. सू. अ. ३ पा. २ सू. १४ |
| १२७ | अर्थैकत्वादेकं वाक्यम् | पू. मी. अ. २ पा. १ सू. १४६ |
| १७८ | अर्धो वा एष आत्मनो- | |
| ३५५ | अर्श आदिभ्योऽच् | अष्टा. अ. ५ पा. २ सू. १२७ |
| ७५ | अर्हे कृत्यतृचश्च | अष्टा. अ. ३ पा. ३ सू. १६९ |
| १४८ | अलौकिकास्तु ये भावाः | |
| १५६ | अवस्थितेरिति काशकृत्स्नः | ब्र. सू. अ. १ पा. ४ सू. २२ |
| १८३ | अवस्थिति-वैशेष्यादिति | ब्र. सू. अ. २ पा. ३ सू. २४ |
| २२७ | अवजानन्ति मां मूढाः | भ. गी. अ. ९ श्लो. ११ |
| २०९ | अविद्याऽप्युपकाराय | मार्कं. पु. रौ. म. अ. ९२ श्लो. २२ |
| २०९ | अविद्या पठ्यते वेदे | मार्कं. पु. रौ. म. अ. ९२ श्लो. १८ |
| २०९ | अविद्या सत्यमेव | मार्कं. पु. रौ. म. अ. ९२ श्लो. १९ |
| १११ | अविनाशी तथा नित्यः | म. भा. अ. ३४ पर्व. १५ श्लो. ७ |
| १३७ | अविनाशी वाऽरे | बृह. अ. ४ ब्रा. ५ मं. १४ |
| ११० | अविप्रणाशः सर्वेषाम् | म. भा. पर्व १५ अ. ३४ श्लो. ४ |
| १८३ | अविरोधश्चन्दनवत् | ब्र. सू. अ. २ पा. ३ सू. २३ |
| १६८ | अव्यक्तमक्षरे लीयते | सुबालोपनिषद्—प्रलयप्रकरणम् |
| ३३३ | अव्यक्ताद्व्यक्तयः सर्वाः | भ. गी. अ. ८ श्लो. १८ |
| ११२ | अव्यक्तादीनि भूतानि | भ. गी. अ. ८ श्लो. ३१ |
| ११२ | अव्यक्तोऽक्षर इत्युक्तः | भ. गी. अ. ८ श्लो. २१ |
| १५ | अव्यक्तोऽयमचिन्त्योऽयम् | भ. गी. अ. २ श्लो. २५ |

| | | |
|---|---|---|
| १५ | अशरीरं शरीरेषु | कठो. प्र. २ मं. २१ |
| ३४६ | अश्वं नत्वा वारवन्तम् | |
| | अंशो नानाव्यपदेशात् | ब्र. सू. अ. २ पा. ३ सू. ४३ |
| ३४७ | असञ्जजान सत आबभूव | तै. आर. प्र. ३ अनु. १४ मं. ९ |
| २७२ | असतः सद्येततक्षु० | |
| १०१ | असदकरणादुपादान० | सांख्य. कौ. श्लो. ९ |
| १०१ | असद्वा इदमग्र आसीत् | तै. व. २ अ. ७ मं. १ |
| २३२ | असद्व्यपदेशात् | ब्र. सू. अ. २ पा. १ सू. १८ |
| २२७ | असत्यमप्रतिष्ठन्ते | भ. गी. अ. १६ श्लो. ८ |
| १५ | असङ्गो ह्ययं पुरुषः | बृह्. अ. ४ ब्रा. ३ मं. १५ |
| २२ | असन्नेव स भवति | तै. २–६–१ |
| ३१४ | असुरानीकवीर्यैः | भा. स्कं. २ अ. १ श्लो. ३६ |
| २३९ | असुर्या नाम ते लोका | ईशा. १ मं. ३ |
| १९६ | अस्थूलमनणु | बृह्. अ. ३ ब्रा. ८ मं. ८ |
| १२९ | अस्मान्मायी सृजते | श्वेता. अ. ४ मं. ९ |
| २१६ | अस्य लोकस्य का गतिः | छान्दो. अ. १ खं. ९ मं. १ |
| १८ | अहमात्मा गुडाकेश | भ. गी. अ. १० श्लो. २० |
| २५७ | अहं भक्तपराधीनो | भा. स्कं. ९ अ. ४ श्लो. ६३ |
| ३४ | अहं सर्वस्य प्रभवः | गी. अ. १० श्लो. ८ |
| १४९ | अहिंसन् सर्वभूतानि | बृह्. अ. ८ खं. १५ मं. १ |

## आ

| | | |
|---|---|---|
| २६५ | आकाशशरीरं ब्रह्म | तै. उ. अ. ६ मं. २ |
| १८३ | आकाशवत्सर्वगतश्च | श. प. ब्रा. १०।६।३।२१ |
| २१६ | आकाशस्तल्लिङ्गात् | ब्र. सू. अ. १ पा. १ सू. २१ |
| २१६ | आकाशादेव सर्वाणि | छान्दो. अ. १ खं. ९ मं. १ |
| ३२५ | आग्नेयं चतुर्धा करोति | ब्राह्मण. |
| ३५ | आचार्यवान् पुरुषो | छान्दो. अ. ६ खं. १४ मं. २ |
| १८२ | आचार्योऽन्तेवासिन | तै. अ. १ अनु. ११ मं. १ |
| २९३ | आज्जसेरसुक् | अष्टा. अ. ७ पा. १ सू. ५० |
| २५६ | आत्तगजेन्द्रलीलः | भा. स्कं. १० अ. ३३ श्लो. २४ |
| १३० | आत्मकृतेः परिणामात् | ब्र. सू. अ. १ पा. ४ सू. २६ |

| | | |
|---|---|---|
| १५१ | आत्मा तस्याष्टमी मूर्तिः | स्मृतिः वि. द्वै. |
| १९० | आत्मानमात्मना हन्ति | अष्टा. १–४–५२ तत्त्वबोधिनी |
| १८१ | आत्मनो वपामुदक्खिदत् | तै. सं. का. २ अध्या. १ अनु. १ |
| २२३ | आत्मानमेवेमम् | बृ. अ. ५ खं. ११ मं. ६ |
| १७९ | आत्मनि ब्रह्मरूपे तु | सि. मु. श्लो. १२ |
| २४६ | आत्मारामोऽपि | भा. स्कं. १० अ. २९ श्लो. ४२ |
| २१२ | आत्मा वा इदमेक एव | ऐतरे. अ. १ खं. १ मं. १ |
| १५२ | आत्मा वै जायते पुत्रः | |
| ११ | आत्मा वा अरे द्रष्टव्यः | बृह. अ. ४ ब्रा. ५ मं. ६ |
| १७ | आत्मेत्येवोपासीत | बृह. अ. १ ब्रा. ४ मं. ७ |
| १७ | आत्मैवेदमग्र आसीत् | बृह. अ. १ ब्रा. ४ मं. १ |
| १३५ | आद्यन्तयोर्यदसतोऽस्ति | भा. स्कं. ११ अ. ६ श्लो. १९ |
| ६० | आनन्दमयोऽभ्यासात् | ब्र. सू. अ. १ पा. १ सू. ११ |
| ६० | आनन्दमात्रकरपाद | नारदपञ्चरात्रे० |
| १७ | आनन्दाद्ध्येव खलु | तै. उ. भृ. व. ३ मं. २ |
| २३८ | आनन्दं ब्रह्मणो विद्वान् | तै. उ. व. २ खं. ४ मं. १ |
| २५७ | आन्महतः | अष्टा. अ. ६ पा. ३ सू. ४६ |
| १४४ | आप्तो नामानुभवेन | चरके |
| ३१० | आपो नारा इति प्रोक्ता | मनुस्मृतिः. |
| १९४ | आभास एव च | ब्र. सू. अ. २ पा. ३ सू. ५० |
| २२४ | आमनन्ति चैनमस्मिन् | ब्र. सू. अ. १ पा. २ सू. ३२ |
| ३१६ | आयास्य इति दौत्यकैः | भा. स्कं. १० अ. ३९ श्लो. ३५ |
| १८३ | आराग्रमात्रो ह्यवरो- | श्वेता. अ. ५ मं. ८ |
| १८९ | आलोमभ्य आनखाग्रेभ्यः | कौषी. ब्रा. ४–२० |
| ७५ | आविर्भावतिरोभावौ | तत्त्व. नि. सर्व. प्र. श्लो. १४० |
| २८६ | आवृत्तावप्यविरोधः | ब्र. सू. अ. १ पा. ३ सू. ३० |
| १२६ | आवृत्तिरसकृदुपदेशात् | ब्र. सू. अ. ४ पा. १ सू. १ |
| ६ | आशीर्नमस्क्रिया वस्तु- | काव्यादर्शे. |
| २२८ | आसीनो दूरं व्रजति | कठो. अ. १ व. २ मं. २० |
| २२७ | आसुरीं योनिमापन्ना- | भ. गी. अ. १६ श्लो. २० |
| २३६ | आह च तन्मात्रम् | ब्र. सू. अ. ३ पा. २ सू. १६ |

| | | |
|---|---|---|
| | इ | |
| २४९ | इत्थं विदिततत्त्वायाम् | भा. स्कं. १० अ. ८ श्लो. ४३ |
| १२ | इति षट्पदीमदीये | शङ्करा. नारायणस्तोत्रे |
| ८ | इतिहासपुराणं वेदानाम् | छान्दो. अ. ७ खं. १–२ मं. १–२ |
| ५३ | इदमः प्रत्यक्षगतम् | रामरुद्रीये |
| ५२ | इदं वै तन्मधु दध्यङ्ङाथर्व. | बृह. अ. २ ब्रा. ५ मं. १९ |
| ८ | इदं सर्वं यदयमात्मे- | बृह. अ. ४ ब्रा. ५ मं. ७ |
| ६ | इन्द्रियैर्विषयाकृष्टैः | भा. स्कं. ४ अ. २२ श्लो. ३० |
| ५३ | इयं पृथिवी सर्वेषाम् | बृह. अ. २ ब्रा. ५ मं. १ |
| ३४३ | इङ्गितज्ञा पुरु प्रौढा | भा. स्कं. ३ अ. २ श्लो. ९ |
| | इन्द्रो मायाभिः | बृ. ह. अ. २ ब्रा. ५ मं. १९ |
| | इनः सूर्ये नृपे पत्यौ | विश्वकोशे |
| १९६ | इवे प्रतिकृतौ | अष्टा. अ. ५ पा. ३ सू. ९६ |
| ३४० | ईक्षेत विभ्रममिदम् | भा. स्कं. ११ अ. १३ श्लो. ३४ |
| १४ | उत्तमः पुरुषस्त्वन्यः | भ. गी. अ. ५ श्लो. १७ |
| १५० | उत्पद्यन्ते चिदात्मानो- | व्योमसंहितायाम् |
| १२८ | उपद्रष्टाऽनुमन्ता | नृसिंहो. ता. खं. ९ |
| ४ | उपमितं व्याघ्रादिभिः | अष्टा. अ. २ पा. १ सू. ५६ |
| २४७ | उपलम्भात्समाचारात् | गौडपादकारिका. प्र. ४ श्लो. २४ |
| | ऊ | |
| १७८ | ऊर्णनाभिस्तन्तुनो- | बृह. अ. २ ब्रा. १ मं. २० |
| | ऋ | |
| १६६ | ऋतौ भार्यामुपेयात् | आश्व. श्रौ. अ. २ खं. १६ |
| ३०५ | ऋहलोर्ण्यत् | अष्टा. अ. ३ पा. १ सू. २४ |
| | ए | |
| ३१३ | एक एव नारायणः | महो. नि. अ. १ मं. १ |
| ५४ | एक एव हि भूतात्मा | ब्रह्मबिन्दूपनिषद्. |
| ३३ | एकमेवाद्वितीयम् | छान्दो. अ. ६ खं. २ श्लो. १ |
| १९ | एकस्या आकृतेश्चरितः | परि. शे. प. भा. १२६ |
| ३३६ | एकं भगवतः कार्यम् | सुबो. स्कं. १०, अ. ५, का. |
| १७ | एकाकी बिभेति | बृह. अ. १ ब्रा. ४ मं. २ |

| | | |
|---|---|---|
| ११० | एकां रात्रिं विहृत्यैवम् | म. भा. प. १ अ. ३३ श्लो. ११–१२ |
| ३४२ | एको देवो बहुधा निविष्टः | तै. आर. प्र. ३ अनु. १४ मं. १ |
| ३१५ | एको ह वै नारायण आसीत् | महो. नि. अ. १ मं. १ |
| ३०७ | एतत्सत्यं ब्रह्मपुरम् | छान्दो. अ. ८ खं. १ मं. ५ |
| ३१० | एतन्नानाऽवताराणाम् | भा. स्कं. १ अ. ३ श्लो. ५ |
| १७१ | एतस्माज्जायते प्राणो | मुण्ड. मु. २ खं. १ मं. ३ |
| ३८ | एतस्य वा अक्षरस्य | बृह. अ. ३ ब्रा. ८ मं. ९ |
| २५३ | एतस्यैवानन्दस्यान्यानि | बृह. अ. ४ ब्रा. ३ मं. ३२ |
| २१७ | एतावानस्य महिमा | शु. यजु. अ. ३१ मं. ३ |
| १७५ | इमं मानवमावर्तम् | छान्दो. अ. ४ खं. १५ मं. ६ |
| ३४३ | एवं बलिष्ठैर्यदुभिर्महद्भिः | भा. स्कं. १ अ. १५ श्लो. २६ |
| १७३ | एवं वा अरे इदं | बृह. अ. २ ब्रा. ४ मं. १२ |
| ७० | एष उ एव | कौषी. ब्रा. ३–९ |
| २१६ | एष आत्मा अपहत- | छान्दो. अ. ८ खं. १ मं. ५ |
| २२८ | एष ह्येवानन्दयाति | तै. उ. व. २ अ. ७ मं. १० |
| ७१ | एष ह्येव साधु कर्म | कौषी. ब्रा. ३–८ |
| १२९ | एष सर्वभूतान्तरात्मा | सौबालवाक्यम् |
| ३५१ | एष ह्येव शून्य एष | महोपनिषदि. मध्वभाष्ये |
| ३५२ | एष ह्येवाव्यक्तः | महोपनिषदि. |
| ३१६ | एष्यामि ते गृहं सुभ्रूः | भा. स्कं. १० अ. ४२ श्लो. १२ |
| १४५ | एषोऽणुरात्मा चेतसा | मुण्ड. मु. ३ खं. १ मं. ९ |
| | | **ऐ** |
| ६० | ऐतदात्म्यमिदं सर्वम् | छान्दो. अ. ६ खं. ८ मं. ७ |
| | | **ओ.** |
| | ओं तत्सदिति निर्देशः | भ. गी. अ. १७ श्लो. २३ |
| ३३३ | ओमित्येकाक्षरं ब्रह्म | भ. गी. अ. ८ श्लो. १३ |
| | | **क** |
| २१४ | कः क्षेमो निजपरयोः | भा. स्कं. ६ अ. १६ श्लो. ४ |
| २१६ | कतमा सा देवता | छान्दो. अ. १ खं. ११ मं. ४ |
| ११० | कथं च त्यक्तदेहानाम् | म. भा. प. १५ अ. ३४ श्लो. २ |
| ६० | कथमसतः सज्जायेत | छान्दो. अ. ६ खं. १२ मं. २ |

| | | |
|---|---|---|
| १४६ | कपूयचरणा रमणीय- | छान्दो. खं. १० मं. ७ |
| १५९ | कर्ता शास्त्रार्थवत्त्वात् | ब्र. सू. अ. २ पा. ३ सू. ३३ |
| १९४ | कर्ता स्वतन्त्र एव स्यात् | तत्त्व. नि. शा. श्लो. ७ |
| ३४८ | कर्माणि पुण्यनिवहानि | भा. स्कं. ११ अ. १ श्लो. ११ |
| २०३ | कश्चिद्धीरः | कठो. अ. २ व. ४ मं. १ |
| १७७ | कश्चिन्मां वेत्ति तत्त्वतः | भ. गी. अ. ७ श्लो. ३ |
| २५१ | कामिनां दर्शयन् दैन्यम् | भा. स्कं. १० अ. ३० श्लो. ३४ |
| २६८ | कार्यायोजनधृत्यादेः | न्या. कु. पं. स्त. ५ श्लो. १ |
| ३४४ | कालात्मना भगवता | भा. स्कं. १० अ. २४ श्लो. ३१ |
| ३२ | कालरूपोऽवतीर्णः | भा. स्कं. १ अ. १३ श्लो. ४७ |
| ३२ | कालोऽस्मि | भ. गी. अ. ११ श्लो. ३२ |
| ३०६ | किं तत्र विद्यते यदन्वेष्टव्यम् | छान्दो. अ. ८ खं. १ मं. १ |
| २०९ | किन्तु विद्यापरिप्राप्तौ | मार्कं. पु. रौ. अ. ९२ श्लो. १ |
| २९२ | कुरु द्विजातिसंस्कारम् | भा. स्कं. १० अ. ८ श्लो. १० |
| १६१ | कृतप्रयत्नापेक्षस्तु | ब्र. सू. अ. २ पा. ३ सू. ४२ |
| २१८ | कृते शुक्लश्चतुर्बाहुः | भा. स्कं. ११ अ. ५ श्लो. २१ |
| ५ | कृत्वा तावन्तमात्मानम् | भा. स्कं. १० अ. श्लो. २० |
| ३२५ | कृत्यल्युटो बहुलम् | अष्टा. अ. ३ पा. ३ सू. ११३ |
| १६७ | कृत्स्नप्रसक्तिर्निरवयवत्व- | ब्र. सू. अ. २ पा. १ सू. २६ |
| २५३ | कृषिर्भूवाचकः | गोपा. तापि. उ. पू. भा. मं. २ |
| ३४४ | कृष्णद्युमणिनिम्लोचे | भा. स्कं. ३ अ. २ श्लो. ७ |
| १०९ | केचिद्विलग्ना दशनान्तरेषु | भ. गी. अ. ११ श्लो. २० |
| १३८ | कोपधाच्च | अष्टा. अ. ४ पा. ३ सू. १३७ |
| २२८ | को ह्येवान्यात् कः प्राण्यात् | तै. व. २ अ. ७ मं. १ |
| २७ | क्रतुं कुर्वीत | छान्दो. अ. ३ खं. १४ मं. १ |
| ७ | क्रीडार्थमात्मन इदम् | भा. स्कं. ८ अ. २२ श्लो. २० |
| २८९ | क्रीडन्तं पातु गोविन्दः | भा. स्कं. १० अ. ६ श्लो. २५ |

ग

| | | |
|---|---|---|
| ३३५ | गच्छ द्वारवतीं सूत | भा. स्कं. ११ अ. ३० श्लो. ४६ |
| ३४४ | गतश्रीषु गृहेष्वहम् | भा. स्कं. ३ अ. २ श्लो. ७ |
| १७४ | गतिसामान्यात् | ब्र. सू. अ. १ पा. १ सू. ९ |

२११ गुणकर्मानुरूपाणि　　　भा. स्कं. १० अ. ८ श्लो. १५
२२३ गुणवचनानां शब्दानां-　　　महाभाष्ये
५१ गुणाद्वाऽऽलोकवत्　　　ब्र. सू. अ. २ पा. ३ सू. २५
३४३ गुप्तैः स्वबाहुभिः　　　भा. स्कं. ११ अ. १ श्लो. ३
१११ गुरुपुत्रमिहानीतम्　　　भा. स्कं १० अ. ४५ श्लो. ४५
१६६ गुर्वङ्गनां नोपगच्छेत्　　　धर्मसूत्रम्
५२ गुहां प्रविष्टौ परमे　　　कठो. व. ३ मं. १
५२ गुहां प्रविष्टावात्मानौ　　　ब्र. सू. अ. १ पा. २ सू. ११
२३१ गोपरूपो हरिः साक्षात्　　　कृ. उ. २० मं. १०
२८९ गोविन्दवेणुमनुमत्त-　　　भा. स्कं. १० अ. २१ श्लो. १०
१५ गौणश्चेन्नात्मशब्दात्　　　ब्र. अ. १ पा. १ सू. ५

घ

१४८ घटसंवृतमाकाशम्　　　ब्रह्मबिन्दूपनिषद्

च

१७१ चतुर्दशपुरुषा अजायन्त　　　महानारायणोपनि. मं. १
२५४ चूतप्रवाल-　　　भा. स्कं. १० अ. २१ श्लो. ८
१७९ चैत्यस्य तत्त्वममलं-　　　भा. स्कं. ३ अ. २८ श्लो. २८

ज

३४६ जघ्नुर्मुकुन्देन विमोहिताः　　　भा. स्कं. ११ अ. ३० श्लो. १७
३०४ जज्ञान एव व्यबाधत　　　ऋ. सं. अष्ट. ८ अ. ६ व. १४
३२१ जन्मान्तरसहस्रेषु
३४ जन्माद्यस्य यतः　　　ब्र. सू. अ. १ पा. १ सू. २
४२ जन्यानां जनकः कालः　　　भाषापरि. श्लो. ४५
३२५ जनिमृङ्भ्याम्　　　उ. सू. ५९८ पा. ४
१८० जयति जननिवासो　　　भा. स्कं. १० अ. ६० श्लो. ४८
१०७ जलान्ते जनमेजय　　　म. भा. प. १५ श्लो. ६
३१६ जात्याख्यायामेकस्मिन्　　　अष्टा. अ. १ पा. २ सू. ५८
५६ जिज्ञासायां संप्रवृत्तो　　　भा. स्कं. ११ अ. १० श्लो. ४
२९ जीव ईशो विशुद्धा चिद्　　　शाङ्करस्य
५५ जीवहानिस्तदा मुक्तिः　　　तत्त्व. नि. शा. का. ५९
१५१ जीवापेतं वेदं म्रियते　　　छान्दो. अ. ६ खं. ११ मं. ३०

